ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

हरिः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणम्

## प्रथमाष्टके प्रपाठकः **1 to 4**

**Version 0.0** **September 30, 2017**

## Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टकं ........ 13

1.1 प्रथमाष्टके प्रथमः प्रपाठकः – अग्न्याधेयब्राह्मणं ........ 13

1.1.1 अनुवाकं 1 – सोमयागशेषभूताः शुक्रामन्थिग्रहप्रचारार्था मन्त्राः 13

1.1.2 अनुवाकं 2 – अथाग्न्याधानप्रकरणं, तत्र कालविशेषविधिः ........ 15

1.1.3 अनुवाकं 3 – देवयजनार्थाः संभाराः ........ 19

1.1.4 अनुवाकं 4 – संभारसँयुक्तायतनेषु अग्न्याधानम् ........ 23

1.1.5 अनुवाकं 5 – तत्र पवमानहवींषि ........ 27

1.1.6 अनुवाकं 6 – पवमानहविर्विस्तारः, हविरन्तराणि, दक्षिणाश्च ........ 30

1.1.7 अनुवाकं 7 – आधानमन्त्राः ........ 34

1.1.8 अनुवाकं 8 – एतद्ब्राह्मणं ........ 35

1.1.9 अनुवाकं 9 – ब्रह्मौदनम् ........ 38

1.1.10 अनुवाकं 10 – पञ्चाग्न्याधानम् ........ 42

1.2 प्रथमाष्टके द्वितीय प्रपाठकः – गवामयनब्राह्मणं ........ 47

1.2.1 अनुवाकं 1 – आधानमन्त्राः पूर्वप्रपाठकशेषभूताः ........ 47

1.2.2 अनुवाकं 2 – विषूवन्नामकं मुख्यमह, तदुभयपार्श्ववर्तीनि चत्वार्यहानि चोच्यन्ते ........ 58

1.2.3 अनुवाकं 3 – विषुवद्दिनेऽतिग्राह्यविशेषाः ........ 60

1.2.4 अनुवाकं 4 – तस्मिन्नेव दिने दिवाकीर्त्यनामानि सामानि......... 62

1.2.5 अनुवाकं 5 – पशवः वैष्णवाद्या नव .......... 63

1.2.6 अनुवाकं 6 – महाव्रतम्.......... 65

1.3 प्रथमाष्टके तृतीय प्रपाठकः – वाजपेयब्राह्मणं.......... 70

1.3.1 अनुवाकं 1 – पुनराधेयशेषः आज्यभागयोर्विशेषः.......... 70

1.3.2 अनुवाकं 2 – वाजपेयस्य विधिः.......... 72

1.3.3 अनुवाकं 3 – तस्यग्रहविशेषाः.......... 75

1.3.4 अनुवाकं 4 – पशवः सप्तदश.......... 78

1.3.5 अनुवाकं 5 – रथयाजनम्.......... 80

1.3.6 अनुवाकं 6 – रथधावनम्.......... 82

1.3.7 अनुवाकं 7 – यूपारोहणम्.......... 86

1.3.8 अनुवाकं 8 – अन्नहोमाः, अभिषेकश्च.......... 89

1.3.9 अनुवाकं 9 – अतिग्राह्याः, पञ्चैन्द्राः.......... 91

1.3.10 Aनुवाकं 10 – पिण्डपितृयज्ञः दर्शपूर्णमासब्राह्मणशेषः.......... 92

1.4 प्रथमाष्टके चतुर्थः प्रपाठकः – सोमादिब्राह्मणं.......... 99

1.4.1 अनुवाकं 1 – ग्रहणा ग्रहणम्.......... 99

1.4.2 अनुवाकं 2 – सोत्रामणीशेषा मन्त्राः.......... 101

1.4.3 अनुवाकं 3 – दोहप्रायश्चित्तम्, अग्निहोत्रे.......... 103

1.4.4 अनुवाकं 4 – अग्निप्रायश्चित्तम् अग्निहोत्रे....................................106
1.4.5 अनुवाकं 5 – सोमातिरेकप्रायश्चित्तम्.............................................111
1.4.6 अनुवाकं 6 – सवननिमित्तं प्रायश्चित्तम्..........................................113
1.4.7 अनुवाकं 7 – यूपविरोहणादिप्रायश्चित्तम्........................................116
1.4.8 अनुवाकं 8 – पावमानीमन्त्राः (स्मार्ते स्नानादौ मार्जनार्थाश्च)..119
1.4.9 अनुवाकं 9 – राजसूयगतचातुर्मास्यशेषः......................................121
1.4.10 अनुवाकं 10 – चातुर्मास्यप्रशंसनम्................................................123

# Introduction and Notes

This Taittireeya Brahmanam book is being compiled for the benefit of Veda Students for learning. There are 3 Major Sections (Ashtakam), containing 28 Prapaatakams (Subject). We plan to cover these in 6 books,
2 books/volumes for each Ashtakam. These books are being published in Sanskrit, Tamil and Malayalam languages. These books are compiled without any commercial interests and can be freely downloaded from our Website **vedavms.in** and are free for sharing/circulation for any non-commercial use only.

**These books are, strictly, for learning under the guidance of a qualified Vedic Guru and not meant for self-learning.**

Our pranams to great Rishis, Gurus and to our guides**, Shri Ganapathy Sharma and Shri Subramania Sharma.** We acknowledge the support of those Veda students and well-wishers who have inspired us to compile these books. We would also like to thank some well wishers, who have provided the Transliteration coding for this compilation.

## Sources of reference:

We have referred the following books mainly for this compilation:

1. Taittireeya Brahmana with the commentary of Shri Battabhaskara Misra, edited by Shri A. Mahadeva Shastri and printed at Mysore by Government Branch Press in 1904.
2. Taittireeya Brahmana printed (around 1865-1880) containing the work of great Scholar Shri Sayanacharya.
3. Taittireeya Brahmana, 2014 edition, printed by Shri Nrusimha Trust, Chennai.

# Notes and Explanations

## Structure of the Book:

The TaittirIya Brahmanam consists of 3 Ashtakams (Major Sections/Volumes). Each Section has multiple Prapaatakams (Subjects). Some books refer to prapaatakam as PraSna. Under each Prapaatakam there are multiple Anuvakams (Chapters). Under each Anuvakam there are paragraphs, known as Dasinis. Dasini is a set of mantras, consisting of 10 statements, each ending with a Ruk-stop. (Vedic full stop).

## Details of Taittireeya Braahmanam:

| | Prapaatakam | Anuvakam | Dasini | Vaakyam |
|---|---|---|---|---|
| **Ashtakam 1** | **8** | **78** | **500** | **5232** |
| **Ashtakam 2** | **8** | **96** | **547** | **5795** |
| **Ashtakam 3** | **9** | **134** | **619** | **6530** |
| **Kaatakam** | **3** | **30** | **167** | **1816** |
| **Total** | **28** | **338** | **1833** | **19373** |

Please note that the counts of Dasani, Anuvaakam, vaakyam, in numbers , given by us for this compilation are as per the book containing the work of Shri Bhaskara Bhattacharya Misra given under “**Sources of reference**” above.

There are minor differences in the way some of the statements of a Dasini are represented with either the previous or next Dasini in other sources of reference.

As per convention, there is no Pada, Krama, Jata and Gana paatams for Braahmanam. The source of Rishi, Chandas and Devata are not mentioned in our Source books of reference.

## Numbering Convention

Every Dasini has a four digit serial number in the from **n.n.n.n at the beginning**

The four level number represents

- First digit - Ashtakam Number
- Second digit – Prapaatakam Number
- Third digit – Anuvaakam Number
- Fourth Digit – the serial number of Dasini within an Anuvaakam

In addition the cumulative serial number of each Dasini, under a Prapaatakam/Prasna is indicated at the end of each Dasini. The number of vaakyams (statements) for each Dasini is mentioned in a bracket.

This helps leaner to verify the vaakyam as per source book and also for us to make sure that it is coded and typed as per the source book.

## Korvai Statement in Braahmanam

A Dasani will have 10 vaakyams only (equivalent to 50 padam-“paanchati” of Samhita). If the Dasani ends in an Anuvakam, the numbers may not be exactly 10. The number of vaayams in the last dasani of an Anuvaham is more than 10, the marking ”**( )”** is made at the end of the 10th vaakaym.

**Exampe:** The Korvai at the end Anuvaakam 2, Dasini reference**1.1.2.8** mentions फल्गुनी षट् च.

“**Shat** cha”, indicates that there are 10+**6** = 16 vaakyams, the tenth statement of the Dasini has key work ‘PalgunI’ and hence **( )** is marked after the word ‘PalgunI’.

Anuvaka Korvai, Special Korvai and Prapaataka Korvai are provided after the last Dasani of the Anuvaham or Prapaatakam. Special Korvai for a Dasini or a set of Dasinis shall be provided at the end of respective Dasani as it is given in the source documents. The Korvai mentions the count of Vaakyams similar to padam in Taitiriya Samhita.

**The various types of korvai mantras are given in a box at the end of the prapaatakam clearly indicating what type of korvai it is.**

## Conventions used

Each Dasani will end with a Ruk Symbol like “|”.

| Styles adopted elesewhere | styles adopted by us |
|---|---|
| namasshiva | namaH shivaaya |
| namassade | namaH sadase |
| deveeSHShadurveer | deveeH Shadurveer |
| नमश्शिवाय | नमः शिवाय |
| नमस्सदसे | नमः सदसे |
| दैवीष्षडुर्वीः | दैवीः षडुर्वीः |
| നമശ്ശിവായ | നമഃ ശിവായ |
| നമസ്സദസേ | നമഃ സദസേ |
| ദൈവീഷ്ഷഡുർവീഃ | ദൈവീഃ ഷഡുർവീഃ |
| நமஶ்ஶிவாய | நமஃ: ஶிவாய |
| நமஸ்ஸதஸே | நமஃ ஸதஸே |
| தை₃வீஷ்ஷடு₃ர்வஃ | தை₃வீஃ ஷடு₃ர்வீஃ |

Where ever the visargam comes in the middle for “sa” “sha” and “Sa” in the padam we have used the doubling principal of visargam . See Expample give below.

pratassavanam

प्रातस्सवनं

പ്രാതസ്സവനം

ப்ராதஸ்ஸவனம்

**For repha letter, “r”**

| **Styles adopted elesewhere** | **styles adopted by us** |
|---|---|
| varSham<br>barhiShi<br>prayatirmE<br>jyOti@rjyOtirmE | var.Sham<br>bar.hiShi<br>prayatir mE<br>jyOti@r jyOtir mE |
| वर्षम्<br>बर्हिषि<br>प्रयतिर्मे<br>ज्योतिर्ज्योतिर्मे | वर्.षम्<br>बर्.हिषि<br>प्रयतिर् मे<br>ज्योतिर् ज्योतिर् मे |
| വർഷം<br>ബർഹിഷി<br>പ്രയതിർ മേ<br>ജ്യോതിർജ്യോതിർമേ | വർ.ഷം<br>ബർ.ഹിഷി<br>പ്രയതിർ മേ<br>ജ്യോതിർ ജ്യോതിർ മേ |
| வர்ஷம்<br>பர்,ஹிஷி<br>ப்ரயதிர் மே<br>ஜ்யோதிர்ஜ்யோதிர்மே | வர்.ஷம்<br>பர்,ஹிஷி<br>ப்ரயதிர் மே<br>ஜ்யோதிர் ஜ்யோதிர் மே |

## Other Conventions used in the compilation

ꣳ – is represented by (gg)

ꣳ – is represented by (gm)

ँ – is represented as anunaasikam

(hyphen) – used between words indicate that the words has parts which need to be rendered together as per your Guru's teachings. This sign is used in areas to split words which are long, the words constructed through Sandhis which result in "different letters" which joins the original padam of words and also for ease of reading/rendering. The usages of hyphens slightly vary in Sanskrit, Malayalam and Tamil books based on the usages in the languages.

**Kindly refer to your Guru for exceptions and how the rendering needs to be made.**

## Important Note :

This version of the book is for learning under the guidance of a Guru. There are some mantras that need expansion when recited as a part of Karma (ritual/function). We are currently taking advice/explanations from reputed sources as to how they need proper expansion. We shall publish an Appendix or Annexure to this book to take care of the same.

## Other Notes

Please notify us corrections / suggestions to our e-mail id **"vedavms@gmail.com".** Also vist our site www.vedavms.in to download our compilations like sukthaas, upanishads, Samhita vaakya padam (all 7 kaandams), samhita pada paatam (for all 7 kaadams) and various veda related articles of interest to Veda students.

**Prarthanaa Mantras:**

1. यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।

2. ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ।

ऊर्ध्वरेतंविरूपाक्षँविश्वरूपाय वै नमो नमः। *(ओं नमः परमात्मने)*

3. गणानां त्वा गणपतिꣳ हवामहे कविं कवीना–मुपमश्रवस्तमं ।

ज्येष्ठराजंब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिः सीदसादनं ।

*(श्री महागणपतयेनमः )*

4. तत्पुरुषायविद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ।

*(कुमारगुरवे नमः)*

5. प्रणो देवी सरस्वति वाजेभिर्वाजिनीवति । धीनामवित्र्यवतु ।

(महासरस्वत्यै नमः)

6. सदाशिव समारम्भां शंकराचार्य मध्यमां ।

अस्मदाचार्य पर्यन्तां वन्दे गुरु परंभरां । *(श्री गुरुभ्यो नमः)*

7. व्यासं वसिष्ठ नप्तारं शक्तेः पौत्रमकल्मषं ।

पराशरात्मजं वन्दे शुक तातं तपोनिधिं ।

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ।

*(श्री वेदव्यासाय  नमः)*

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टकं

## 1.1 प्रथमाष्टके प्रथमः प्रपाठकः - अग्न्याधेयब्राह्मणं

### 1.1.1 अनुवाकं 1 - सोमयागशेषभूताः शुक्रामन्थिग्रहप्रचारार्था मन्त्राः

**1.1.1.1**

ब्रह्म संधत्तं तन्मे जिन्वतम् । क्षत्रꣳ सन्धत्तं तन्मे जिन्वतम् ।

इषꣳ संधत्तं तां मे जिन्वतम् । ऊर्जꣳ संधत्तं तां मे जिन्वतम् ।

रयिꣳ संधत्तं तां मे जिन्वतम् । पुष्टिꣳ संधत्तं तां मे जिन्वतम् ।

प्रजाꣳ संधत्तं तां मे जिन्वतम् । पशून् थ्संधत्तं तान्मे जिन्वतम् ।

स्तुतोऽसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु । **1 (10)**

**1.1.1.2**

सुवीराः प्रजाः प्रजनयन् परीहि । शुक्रः शुक्रशोचिषा । स्तुतोऽसि

जनधाः । देवास्त्वा मन्थिपाः प्रणयन्तु । सुप्रजाः प्रजाः प्रजनयन्

परीहि । मन्थी मन्थिशोचिषा । संजग्मानौ दिव आ पृथिव्याऽऽयुः ।

संधत्तं तन्मे जिन्वतम् । प्राणꣳ संधत्तं तं मे जिन्वतम् ।

अपान॑ꣳ संध॑त्तं तं मे जिन्वतम् । **2 (10)**

**1.1.1.3**

व्यान॑ꣳ संध॑त्तं तं मे जिन्वतम् । चक्षुः संध॑त्तं तन्मे जिन्वतम् ।
श्रोत्र॑ꣳ संध॑त्तं तन्मे जिन्वतम् । मनः संध॑त्तं तन्मे जिन्वतम् ।
वाच॑ꣳ संध॑त्तं तां मे जिन्वतम् । आयुः स्थ आयुर्मे धत्तम् । आयुर्
यज्ञाय धत्तम् । आयुर् यज्ञपतये धत्तम् । प्राणः स्थः प्राणं मे धत्तम् ।
प्राणं ँयज्ञाय धत्तम् । **3 (10)**

**1.1.1.4**

प्राणं ँयज्ञपतये धत्तम् । चक्षुः स्थश्चक्षुर्मे धत्तम् । चक्षुर् यज्ञाय
धत्तम् । चक्षुर् यज्ञपतये धत्तम् । श्रोत्रꣳ स्थः श्रोत्रं मे धत्तम् । श्रोत्रं
ँयज्ञाय धत्तम् । श्रोत्रं ँयज्ञपतये धत्तम् । तौ देवौ शुक्रामन्थिनौ ।
कल्पयतं दैवीर्विशः । कल्पयतं मानुषीः । **4 (10)**

**1.1.1.5**

इष–मूर्जमस्मासु धत्तम् । प्राणान् पशुषु । प्रजां मयि च यजमाने
च । निरस्तः शण्डः । निरस्तो मर्कः । अपनुत्तौ शण्डामर्कौ
सहामुना । शुक्रस्य समिदसि । मन्थिनः समिदसि ।

स प्रथमः संकृतिर् विश्वकर्मा । स प्रथमो मित्रो वरुणो
अग्निः ( ) । स प्रथमो बृहस्पतिश्चिकित्वान् ।
तस्मा इन्द्राय सुतमाजुहोमि । **5 (12)** *(नय – न्त्वपान॑ संधत्तं तं मे जिन्वतं – प्राणं यँज्ञाय धत्तं – मानुषीर् – अग्निर् द्वे च)* (A1)

(**Special Korvai for Anuvakam 1** )
ब्रह्म क्षत्रं तत् । इषमूर्ज॑ रयिं पुष्टिं प्रजां ताम् । पशुन् तान् ।
सन्धत्तं तत् । प्राणमपानं व्यानं तम् । चक्षुः श्रोत्रं मनस्तत् । वाचं
ताम् । इषादिपञ्चके वाचं तां मे । पशून् थ्संधत्तं तान्मे ।
प्राणादित्रितये तं मे । अन्यत्र तन्मे । )

## 1.1.2 अनुवाकं 2 – अथाग्न्याधानप्रकरणं, तत्र कालविशेषविधिः

**1.1.2.1**

कृत्तिका–स्वग्नि–मादधीत । एतद्वा अग्नेर् नक्षत्रम् । यत् कृत्तिकाः ।
स्वायामेवैनं देवतायामाधाय । ब्रह्मवर्चसी भवति । मुखं वा
एतन्नक्षत्राणाम् । यत् कृत्तिकाः । यः कृत्तिका–स्वग्नि–माधत्ते ।
मुख्य एव भवति । अथो खलु । **6 (10)**

**1.1.2.2**

अग्नि-नक्षत्रमित्य-पचायन्ति । गृहान्.ह दाहुको भवति ।
प्रजापती रोहिण्या-मग्नि-मसृजत । तं देवा रोहिण्या-मादधत ।
ततो वै ते सर्वान् रोहानरोहन्न् । तद्-रोहिण्यै रोहिणित्वम् ।
यो रोहिण्या-मग्निमाधत्ते । ऋध्नोत्येव । सर्वान् रोहान्-रोहति ।
देवा वै भद्राः सन्तोऽग्नि-माधित्सन्त । **7 (10)**

**1.1.2.3**

तेषामनाहितो ऽग्निरासीत् । अथैभ्यो वामं ँवस्वपाक्रामत् ।
ते पुनर्वस्वोरादधत । ततो वै तान् वामं ँवसूपावर्तत । यः पुरा
भद्रः संपापीयान् थ्स्यात् । स पुनर्वस्वो-रग्नि-मादधीत ।
पुनरेवैनं ँवामं ँवसूपावर्तते । भद्रो भवति । यः कामयेत दानकामा
मे प्रजाः स्युरिति । स पूर्वयोः फल्गुन्यो-रग्नि-मादधीत । **8 (10)**

**1.1.2.4**

अर्यम्णो वा एतन्नक्षत्रम् । यत्पूर्वे फल्गुनी । अर्यमेति तमाहुर्यो ददाति ।
दानकामा अस्मै प्रजा भवन्ति । यः कामयेत भगी स्यामिति ।
स उत्तरयोः फल्गुन्यो-रग्निमादधीत । भगस्य वा एतन्नक्षत्रम् ।

यदुत्तरे फल्गुनी । भग्येव भवति ।

कालकञ्जा वै नामासुरा आसन्न् । **9 (10)**

**1.1.2.5**

ते सुवर्गाय लोकायाग्नि-मचिन्वत । पुरुष इष्टका-मुपादधात्-पुरुष इष्टकाम् । स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त ।

एषा मे चित्रा नामेति । ते सुवर्गं ँलोकमाप्रारोहन्न् ।

स इन्द्र इष्टकामावृहत् । तेऽवाकीर्यन्त । येऽवाकीर्यन्त ।

त ऊर्णावभयोऽभवन्न् । द्वावुदपतताम् । **10 (10)**

**1.1.2.6**

तौ दिव्यौ श्वानावभवताम् । यो भ्रातृव्यवान् थ्स्यात् ।

स चित्राया-मग्नि-मादधीत । अवकीर्यैव भ्रातृव्यान् ।

ओजो बलमिन्द्रियं ँवीर्यमात्मन्-धत्ते । वसन्ता ब्राह्मणो ऽग्निमादधीत ।

वसन्तो वै ब्राह्मणस्यर्तुः । स्व एवैन-मृतावाधाय । ब्रह्मवर्चसी भवति ।

मुखं ँवा एतदृतूनाम् । **11 (10)**

**1.1.2.7**

यद्–वसन्तः । यो वसन्ताऽग्निमाधत्ते । मुख्य एव भवति ।

अथो योनिमन्तमेवैनं प्रजातमाधत्ते । ग्रीष्मे राजन्य आदधीत ।

ग्रीष्मो वै राजन्यस्यर्तुः । स्व एवैनमृतावाधाय । इन्द्रियावी भवति ।

शरदि वैश्य आदधीत । शरद्वै वैश्यस्यर्तुः । **12 (10)**

**1.1.2.8**

स्व एवैनमृतावाधाय । पशुमान् भवति । न पूर्वयोः फल्गुन्यो–

रग्निमादधीत । एषा वै जघन्या रात्रिः सँवथ्सरस्य । यत्पूर्वे फल्गुनी ।

पृष्टित एव सँवथ्सरस्या–ग्निमाधाय । पापीयान्–भवति ।

उत्तरयोरादधीत । एषा वै प्रथमा रात्रिः सँवथ्सरस्य ।

यदुत्तरे फल्गुनी ( ) । मुखत एव सँवथ्सरस्या–ग्निमाधाय ।

वसीयान् भवति । अथो खलु । यदैवैनं ँयज्ञ उपनमेत् ।

अथाऽऽदधीत । सैवास्यर्द्धिः । **13 (16)**

*(खल्वा – धिथ्सन्त – फल्गुन्योरग्निमादधीता – सन् – नपतता – मृतूनां – वैँश्यस्यर्तु – रुत्तरे फल्गुनी षट् च) (A2)*

## 1.1.3 अनुवाकं 3 – देवयजनार्थाः संभाराः

**1.1.3.1**

उद्धन्ति । यदेवास्या अमेध्यम् । तदप हन्ति । अपोऽवोक्षति शान्त्यै ।
सिकता निवपति । एतद्वा अग्नेर् वैश्वानरस्य रूपम् । रूपेणैव
वैश्वानरमव–रुन्धे । ऊषान् निवपति । पुष्टिर्वा एषा प्रजननम् ।
यदूषाः । **14 (10)**

**1.1.3.2**

पुष्ट्यामेव प्रजनने ऽग्निमाधत्ते । अथो संज्ञान एव । सं ज्ञान॰
ह्येतत् पशूनाम् । यदूषाः । द्यावापृथिवी सहास्ताम् । ते वियती
अब्रूताम् । अस्त्वेव नौ सह यज्ञियमिति । यदमुष्या यज्ञियमासीत् ।
तदस्या–मदधात् । त ऊषा अभवन्न् । **15 (10)**

**1.1.3.3**

यदस्या यज्ञियमासीत् । तदमुष्या–मदधात् । तददश्चन्द्रमसि कृष्णम् ।
ऊषान्निवपन्नदो ध्यायेत् । द्यावापृथिव्योरेव यज्ञिये–ऽग्निमाधत्ते ।
अग्निर्देवेभ्यो निलायत । आखू रूपं कृत्वा । स पृथिवीं प्राविशत् ।
स ऊतीः कुर्वाणः पृथिवीमनु समचरत् । तदाखुकरीष–मभवत् ।

**16 (10)**

**1.1.3.4**

यदाखुकरीष॑ संभारो भवति । यदेवास्य तत्र न्यक्तम् ।
तदेवावरुन्धे । ऊर्जं वा एत॑ रसं पृथिव्या उपदीका
उद्दिहन्ति । यद् वल्मीकम् । यद् वल्मीकवपा संभारो भवति ।
ऊर्जमेव रसं पृथिव्या अवरुन्धे । अथो श्रोत्रमेव ।
श्रोत्र॑ ह्येतत् पृथिव्याः । यद् वल्मीकः । **17 (10)**

**1.1.3.5**

अबधिरो भवति । य एवं वेद । प्रजापतिः प्रजा असृजत ।
तासामन्न–मुपाक्षीयत । ताभ्यः सूदमुप प्राभिनत् । ततो वै तासामन्नं
नाक्षीयत । यस्य सूदः संभारो भवति । नास्य गृहेऽन्नं क्षीयते ।
आपो वा इदमग्रे सलिलमासीत् । तेन प्रजापतिरश्राम्यत् । **18 (10)**

**1.1.3.6**

कथमिद॑ स्यादिति । सोऽपश्यत् पुष्करपर्णं तिष्ठत् । सोऽमन्यत ।
अस्ति वै तत् । यस्मिन्–निदमधि तिष्ठतीति । स वराहो रूपं
कृत्वोपन्यमज्जत् । स पृथिवीमध आर्च्छत् । तस्या उपहत्योदमज्जत् ।
तत् पुष्करपर्णे ऽप्रथयत् । यदप्रथयत् । **19 (10)**

**1.1.3.7**

तत् पृथिव्यै पृथिवित्वम् । अभूद्वा इदमिति । तद्भूम्यै भूमित्वम् ।

तां दिशोऽनु वातः समवहत् । ता৺ शर्कराभिरदृ৺हत् ।

शं ँवै नोऽभूदिति । तच्छर्कराणा৺ शर्करत्वम् । यद्–वराहविहत৺

संभारो भवति । अस्यामेवा–छम्बट्कारमग्नि–माधत्ते ।

शर्करा भवन्ति धृत्यै । **20 (10)**

**1.1.3.8**

अथो शंत्वाय । सरेता अग्निराधेय इत्याहुः । आपो वरुणस्य पत्नय

आसन्न् । ता अग्निरभ्यध्यायत् । ताः समभवत् । तस्य रेतः पराऽपतत् ।

तद्धिरण्य–मभवत् । यद्धिरण्य–मुपास्यति । सरेतसमेवाग्नि–माधत्ते ।

पुरुष इन्वै स्वाद्–रेतसो बीभथ्सत इत्याहुः । **21 (10)**

**1.1.3.9**

उत्तरत उपास्यत्य–बीभथ्सायै । अति प्रयच्छति ।

आर्तिमेवाति प्रयच्छति । अग्निर्देवेभ्यो निलायत । अश्वो रूपं कृत्वा ।

सोऽश्वत्थे सँवथ्सर–मतिष्ठत् । तदश्वत्थस्या–श्वत्थत्वम् ।

यदाश्वत्थः संभारो भवति । यदेवास्य तत्र न्यक्तम् ।

तदेवाव–रुन्धे । **22 (10)**

**1.1.3.10**

देवा वा ऊर्जं ँव्यभजन्त । तत उदुम्बर उदतिष्ठत् । ऊर्ग्वा उदुम्बरः । यदौदुम्बरः संभारो भवति । ऊर्जमेवाव-रुन्धे । तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्याहरत् । तस्य पर्णमच्छिद्यत । तत्पर्णो ऽभवत् । तत् पर्णस्य पर्णत्वम् । **23 (10)**

**1.1.3.11**

यस्य पर्णमयः संभारो भवति । सोमपीथमेवाव रुन्धे । देवा वै ब्रह्मन्नवदन्त । तत् पर्ण उपाशृणोत् । सुश्रवा वै नाम । यत् पर्णमयः संभारो भवति । ब्रह्मवर्चसमेवाव रुन्धे । प्रजापति-रग्नि-मसृजत । सोऽबिभेत्प्र मा धक्ष्यतीति । तꣳ शम्याऽशमयत् । **24 (10)**

**1.1.3.12**

तच्छम्यै शमित्वम् । यच्छमीमयः संभारो भवति । शान्त्या अप्रदाहाय । अग्नेः सृष्टस्य यतः । विकङ्कतं भा आर्च्छत् । यद्-वैकङ्कतः संभारो भवति । भा एवावरुन्धे । सहृदयो ऽग्निराधेय इत्याहुः । मरुतोऽद्भिरग्नि-मतमयन्न् । तस्य तान्तस्य हृदयमाच्छिन्दन्न् ( )। साऽशनिरभवत् । यदशनिहतस्य वृक्षस्य संभारो भवति ।

सहृदय-मेवाग्नि-माधत्ते । **25 (13)**

*(ऊषा – अभवन् – नभवद् – वल्मीकों – ऽश्राम्य – दप्रथय – छृत्यै – बीभथ्सत इत्याहु – रुन्धे – पर्णत्व – मशमयद – च्छिन्द८ स्त्रीणि च) (A3)*

## 1.1.4 अनुवाकं 4 – संभारसँयुक्तायतनेषु अग्न्याधानम्

**1.1.4.1**

द्वादशसु विक्रामेष्वग्निमादधीत । द्वादश मासाः सँवथ्सरः ।

सँवथ्सरा-देवैन-मवरुध्या-धत्ते । यद्-द्वादशसु विक्रामे-ष्वादधीत ।

परिमितमवरुन्धीत । चक्षुर् निमित आदधीत ।

इयद्-द्वादश विक्रामा(3) इति । परिमितं चैवापरिमितं चावरुन्धे ।

अनृतं ँवै वाचा वदति । अनृतं मनसा ध्यायति । **26 (10)**

**1.1.4.2**

चक्षुर् वै सत्यम् । अद्रा(3)गित्याह । अदर्.शमिति । तथ् सत्यम् ।

यश्चक्षुर्-निमितेऽग्नि-माधत्ते । सत्य एवैन-माधत्ते ।

तस्मादाहिताग्निर्नानृतं ँवदेत् । नास्य ब्राह्मणोऽनाश्वान् गृहे वसेत् ।

सत्ये ह्यस्याग्निराहितः । आग्नेयी वै रात्रिः । **27 (10)**

**1.1.4.3**

आग्नेयाः पशवः । ऐन्द्रमहः । नक्तं गार्.हपत्य–मादधाति ।

पशूनेवाव–रुन्धे । दिवाऽऽहवनीयम् । इन्द्रियमेवा–वरुन्धे ।

अर्धोदिते सूर्य आहवनीय–मादधाति । एतस्मिन् वै लोके प्रजापतिः

प्रजा असृजत । प्रजा एव तद्–यजमानः सृजते ।

अथो भूतं चैव भविष्यच्चा–वरुन्धे । **28 (10)**

**1.1.4.4**

इडा वै मानवी यज्ञानूकाशिन्यासीत् । साऽशृणोत् । असुरा

अग्निमादधत इति । तदगच्छत् । त आहवनीयमग्र आदधत ।

अथ गार्.हपत्यम् । अथा–न्वाहार्य–पचनम् । सा ऽब्रवीत् ।

प्रतीच्येषा॑ श्रीरगात् । भद्रा भूत्वा पराभविष्यन्तीति । **29 (10)**

**1.1.4.5**

यस्यैव–मग्निराधीयते । प्रतीच्यस्य श्रीरेति । भद्रो भूत्वा पराभवति ।

साऽशृणोत् । देवा अग्नि–मादधत इति । तदगच्छत् ।

तेऽन्वाहार्य–पचनमग्र आदधत । अथ गार्.हपत्यम् ।

अथाहवनीयम् । साऽब्रवीत् । **30 (10)**

**1.1.4.6**

प्राच्येषा॰ श्रीरगात् । भद्रा भूत्वा सुवर्गं ँल्लोकमेष्यन्ति ।

प्रजां तु न वेथ्स्यन्त इति । यस्यैवमग्नि-राधीयते । प्राच्यस्य श्रीरेति ।

भद्रो भूत्वा सुवर्गं ँल्लोकमेति । प्रजां तु न विन्दते । साऽब्रवीदिडा

मनुम् । तथा वा अहं तवाग्नि-माधास्यामि ।

यथा प्र प्रजया पशुभिर् मिथुनैर् जनिष्यसे । **31 (10)**

**1.1.4.7**

प्रत्यस्मिन् ँल्लोके स्थास्यसि । अभि सुवर्गं ँल्लोकं जेष्यसीति ।

गार्.हपत्यमग्र आदधात् । गार्.हपत्यं ँवा अनु प्रजाः पशवः

प्रजायन्ते । गार्.हपत्येनैवास्मै प्रजां पशून् प्राजनयत् ।

अथा-न्वाहार्य-पचनम् । तिर्यङ्ङिव वा अयं ँल्लोकः ।

अस्मिन्नेव तेन लोके प्रत्यतिष्ठत् । अथाहवनीयम् ।

तेनैव सुवर्गं ँल्लोक-मभ्यजयत् । **32 (10)**

**1.1.4.8**

यस्यैवमग्नि-राधीयते । प्र प्रजया पशुभिर् मिथुनैर् जायते ।

प्रत्यस्मिन् ँल्लोके तिष्ठति । अभि सुवर्गं ँल्लोकं जयति ।

यस्य वा अयथादेवतमग्नि-राधीयते । आ देवताभ्यो वृश्च्यते ।
पापीयान् भवति । यस्य यथा देवतम् । न देवताभ्य आवृश्च्यते ।
वसीयान् भवति ( ) । **33 (10)**

**1.1.4.9**

भृगूणां त्वाऽङ्गिरसां ँव्रतपते व्रतेना-दधामीति भृग्वङ्गिरसामादध्यात् ।
आदित्यानां त्वा देवानां ँव्रतपते व्रतेनादधामीत्यन्यासां ब्राह्मणीनां
प्रजानाम् । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामीति राज्ञः ।
इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य । मनोस्त्वा
ग्रामण्यो व्रतपते व्रतेनादधामीति वैश्यस्य । ऋभूणां त्वा देवानां
ँव्रतपते व्रतेनादधामीति रथकारस्य । यथा देवतमग्नि-राधीयते ।
न देवताभ्य आ वृश्च्यते । वसीयान् भवति । **34 (9)**

*(ध्यायति - वै रात्रि - श्चावरुन्धे - भविष्यन्तीत्य - ब्रवी -
ज्जनिष्यसे - ऽजयद् - वसीयान् भवति - नव च) (A4)*

## 1.1.5 अनुवाकं 5 – तत्र पवमानहबींषि

**1.1.5.1**

प्रजापतिर् वाचः सत्य-मपश्यत् । तेनाग्निमाधत्त ।
तेन वै स आर्ध्नोत् । भूर्भुवः सुवरित्याह । एतद्वै वाचः सत्यम् ।
य एतेनाग्नि-माधत्ते । ऋध्नोत्येव । अथो सत्यप्राशूरेव भवति ।
अथो य एवं ँविद्वानभिचरति । स्तृणुत एवैनम् । **35 (10)**

**1.1.5.2**

भूरित्याह । प्रजा एव तद्-यजमानः सृजते । भुव इत्याह ।
अस्मिन्नेव लोके प्रति तिष्ठति । सुवरित्याह । सुवर्ग एव लोके
प्रति तिष्ठति । त्रिभिरक्षरैर्-गार्.हपत्य-मादधाति । त्रय इमे लोकाः ।
एष्वेवैनं ँलोकेषु प्रतिष्ठित-माधत्ते ।
सर्वैः पञ्चभि-राहवनीयम् । **36 (10)**

**1.1.5.3**

सुवर्गाय वा एष लोकायाधीयते । यदाहवनीयः । सुवर्ग एवास्मै
लोके वाचः सत्यꣳ सर्वमाप्नोति । त्रिभिर् गार्.हपत्य-मादधाति ।
पञ्चभि-राहवनीयम् । अष्टौ संपद्यन्ते । अष्टाक्षरा गायत्री ।
गायत्रोऽग्निः । यावानेवाग्निः । तमाधत्ते । **37 (10)**

**1.1.5.4**

प्रजापतिः प्रजा असृजत । ता अस्माथ् सृष्टाः पराचीरायन्न् । ताभ्यो ज्योति-रुदगृह्णात् । तं ज्योतिः पश्यन्तीः प्रजा अभिसमावर्तन्त । उपरीवाग्नि-मुद्गृह्णीया-दुद्धरन्न् । ज्योतिरेव पश्यन्तीः प्रजा यजमान-मभि-समावर्तन्ते । प्रजापतेरक्ष्यश्वयत् । तत् पराऽपतत् । तदश्वोऽभवत् । तदश्वस्या-श्वत्वम् । **38 (10)**

**1.1.5.5**

एष वै प्रजापतिः । यदग्निः । प्राजापत्योऽश्वः । यदश्वं पुरस्तान्नयति । स्वमेव चक्षुः पश्यन् प्रजापति-रनूदेति । वज्री वा एषः । यदश्वः । यदश्वं पुरस्तान्नयति । जातानेव भ्रातृव्यान् प्रणुदते । पुनरावर्तयति । **39 (10)**

**1.1.5.6**

जनिष्यमाणानेव प्रतिनुदते । न्याहवनीयो गार्.हपत्य-मकामयत । नि गार्.हपत्य आहवनीयम् । तौ विभाजं नाशक्नोत् । सोऽश्वः पूर्ववाड्-भूत्वा । प्राञ्चं पूर्वमुदवहत् । तत् पूर्ववाहः पूर्ववाट्-त्वम् । यदश्वं पुरस्तान्नयति । विभक्तिरेवैनयोस्सा ।

अथो नानावीर्यावेवैनौ कुरुते । **40 (10)**

**1.1.5.7**

यदुपर्युपरि शिरो हरेत् । प्राणान् विच्छिन्द्यात् । अधोऽधः शिरो हरति ।
प्राणानां गोपीथाय । इयत्यग्रे हरति । अथेयत्यथेयति । त्रय इमे
लोकाः । एष्वेवैनं ँल्लोकेषु प्रतिष्ठितमा-धत्ते ।
प्रजापति-रग्नि-मसृजत । सोऽबिभेत्प्र मा धक्ष्यतीति । **41 (10)**

**1.1.5.8**

तस्य त्रेधा महिमानं ँव्यौहत् । शान्त्या अप्रदाहाय । यत्-त्रेधाऽग्नि-
राधीयते । महिमानमेवास्य तद्-व्यूहति । शान्त्या अप्रदाहाय ।
पुनरावर्तयति । महिमानमेवास्य सन्दधाति ।
पशुर्वा एषः । यदश्वः । एष रुद्रः । **42 (10)**

**1.1.5.9**

यदग्निः । यदश्वस्य पदेऽग्नि-मादध्यात् । रुद्राय पशू-नपिदध्यात् ।
अपशुर् यजमानः स्यात् । यं नाक्रमयेत् । अनवरुद्धा अस्य पशवः
स्युः । पार्श्वत आक्रमयेत् । यथा ऽऽहितस्याग्ने-रङ्गारा अभ्यववर्तेरन्न् ।
अवरुद्धा अस्य पशवो भवन्ति । न रुद्रायापिदधाति । **43 (10)**

**1.1.5.10**

त्रीणि हवीꣳषि निर्वपति । विराज एव विक्रान्तं ँयजमानोऽनु विक्रमते । अग्नये पवमानाय । अग्नये पावकाय । अग्नये शुचये । यदग्नये पवमानाय निर्वपति । पुनात्येवैनम् । यदग्नये पावकाय । पूत एवास्मि-न्नन्नाद्यं दधाति । यदग्नये शुचये ( ) । ब्रह्मवर्चस-मेवास्मि-न्नुपरिष्टाद्-दधाति । **44 (11)**

*(एन - माहवनीयं - धत्ते - ऽश्वत्वं - ँवर्तयति - कुरुत - इति -रुद्रो - दधाति - यदग्नये शुचय एकं च) (A5)*

**1.1.6** अनुवाकं 6 – पवमानहविर्विस्तारः, हविरन्तराणि, दक्षिणाश्च

**1.1.6.1**

देवासुराः सँयत्ता आसन्न् । ते देवा विजय-मुपयन्तः । अग्नौ वामं ँवसु सं न्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तदग्निर्नोथ्-सहमशक्नोत् । तत्-त्रेधा विन्यदधात् । पशुषु तृतीयम् । अफ्सु तृतीयम् । आदित्ये तृतीयम् । **45 (10)**

**1.1.6.2**

तद्-देवा विजित्य । पुनरवारुरुथ्सन्त । तेऽग्नये पवमानाय पुरोडाश-मष्टाकपालं निरवपन्न् । पशवो वा अग्निः पवमानः । यदेव पशुष्वासीत् । तत्-तेनावारुन्धत । तेऽग्नये पावकाय । आपो वा अग्निः पावकः । यदेवाफ्स्वासीत् । तत्-तेनावारुन्धत । **46 (10)**

**1.1.6.3**

तेऽग्नये शुचये । असौ वा आदित्योऽग्निः शुचिः । यदेवादित्य आसीत् । तत्-तेनावारुन्धत । ब्रह्मवादिनो वदन्ति । तनुवो वावैता अग्न्याधेयस्य । आग्नेयो वा अष्टाकपालो ऽग्न्याधेयमिति । यत्तं निर्वपेत् । नैतानि । यथाऽऽत्मा स्यात् । **47 (10)**

**1.1.6.4**

नाङ्गानि । तादृगेव तत् । यदेतानि निर्वपेत् । न तम् । यथाऽङ्गानि स्युः । नात्मा । तादृगेव तत् । उभयानि सहनिरुप्याणि । यज्ञस्य सात्मत्वाय । उभयं ँवा एतस्येन्द्रियं ँवीर्यमाप्यते । **48 (10)**

**1.1.6.5**

योऽग्निमाधत्ते । ऐन्द्राग्न-मेकादशकपालमनु निर्वपेत् । आदित्यं चरुम् । इन्द्राग्नी वै देवाना-मयातयामानौ । ये एव देवते अयातयाम्नी ।

ताभ्यामेवास्मा इन्द्रियं वीर्यमव- रुन्धे । आदित्यो भवति । इयं वा अदितिः । अस्यामेव प्रतितिष्ठति । धेन्वै वा एतद्-रेतः । **49 (10)**

**1.1.6.6**

यदाज्यम् । अनडुहस्तण्डुलाः । मिथुनमेवाव-रुन्धे । घृते भवति । यज्ञस्यालूक्षान्तत्वाय । चत्वार आर्.षेयाः प्राश्ञन्ति । दिशामेव ज्योतिषि जुहोति । पशवो वा एतानि हवी॑ष्षि । एष रुद्रः । यदग्निः । **50 (10)**

**1.1.6.7**

यथ्सद्य एतानि हवी॑ष्षि निर्वपेत् । रुद्राय पशूनपि दध्यात् । अपशुर्-यजमानः स्यात् । यन्नानुनिर्वपेत् । अनवरुद्धा अस्य पशवः स्युः । द्वादशसु रात्रीष्वनु निर्वपेत् । सँवथ्सर प्रतिमा वै द्वादश रात्रयः । सँवथ्सरेणैवास्मै रुद्र॑ शमयित्वा । पशूनव रुन्धे । यदेक-मेकमेतानि हवी॑ष्षि निर्वपेत् । **51 (10)**

**1.1.6.8**

यथा त्रीण्यावपनानि पूरयेत् । तादृक्तत् । न प्रजननमुच्छि॑ष्षेत् । एकं निरुप्य । उत्तरे समस्येत् ।

तृतीयमेवास्मै लोकमुच्छ्रिꣳषति प्रजननाय । तं प्रजया पशुभिरनु प्रजायते । अथो यज्ञस्यैवैषाऽभिक्रान्तिः । रथचक्रं प्रवर्तयति । मनुष्यरथेनैव देवरथं प्रत्यवरोहति । **52 (10)**

**1.1.6.9**

ब्रह्मवादिनो वदन्ति । होतव्य–मग्निहोत्रां(3) नहोतव्या(3)मिति । यद्–यजुषा जुहुयात् । अयथापूर्वमाहुती जुहुयात् । यन्न जुहुयात् । अग्निः पराभवेत् । तूष्णीमेव होतव्यम् । यथापूर्व–माहुती जुहोति । नाग्निः पराभवति । अग्नीधे ददाति । **53 (10)**

**1.1.6.10**

अग्निमुखा–नेवर्तून् प्रीणाति । उपबर्.हणं ददाति । रूपाणामव–रुध्यै । अश्वं ब्रह्मणे । इन्द्रियमेवाव–रुन्धे । धेनुꣳ होत्रे । आशिष एवावरुन्धे । अनड्वाह–मध्वर्यवे । वह्निर्वा अनड्वान् । वह्निरध्वर्युः । **54 (10)**

**1.1.6.11**

वह्निनैव वह्नि यज्ञस्याव–रुन्धे । मिथुनौ गावौ ददाति । मिथुनस्याव–रुध्यै । वासो ददाति । सर्व देवत्यं वै वासः । सर्वा एव देवताः प्रीणाति । आ द्वादशभ्यो ददाति ।

द्वादश मासाः सँवथ्सरः । सँवथ्सर एव प्रति तिष्ठति ।
काममूर्ध्वं देयम् ( ) । अपरिमितस्याव-रुध्यै । **55 (11)**

*(आदित्ये तृतीय - मफ्स्वासीत् तत् तेनावारुन्धत - स्या - दाप्यते - रेतो - ऽग्नि - रेकमेक मेतानि हवि॑ंषि निर्वपेत् - प्रत्यवरोहति - ददात्य - ध्वर्युर् - देय मेकं च) (A6)*

**1.1.7** अनुवाकं 7 – आधानमन्त्राः

**1.1.7.1**

घर्मः शिरस्तदयमग्निः । सं प्रियः पशुभिर् भुवत् । छर्दिस्तोकाय तनयाय यच्छ । वातः प्राणस्तदयमग्निः । सं प्रियः पशुभिर् भुवत् । स्वदितं तोकाय तनयाय पितुं पच । प्राचीमनु प्रदिशं प्रेहि विद्वान् । अग्नेरग्ने पुरो अग्निर् भवेह । विश्वा आशा दीद्यानो विभाहि । ऊर्जं नो धेहि द्विपदे चतुष्पदे । **56 (10)**

**1.1.7.2**

अर्कश्चक्षु-स्तदसौ सूर्यस्तदयमग्निः । संप्रियः पशुभिर् भुवत् । यत् ते शुक्र शुक्रं ँवर्चः शुक्रा तनूः । शुक्रं ज्योतिरजस्रम् । तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाऽग्ने ब्रह्मणा ।

आनशे व्यानशे सर्वमायुर् व्यानशे । ये ते अग्ने शिवे तनुवौ । विराट् च स्वराट् च । ते मा विशतां ते मा जिन्वताम् । **57 (10)**

**1.1.7.3**

ये ते अग्ने शिवे तनुवौ । सम्राट् चाभिभूश्च । ते मा विशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । विभूश्च परिभूश्च । ते मा विशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । प्रभ्वी च प्रभूतिश्च । ते मा विशतां ते मा जिन्वताम् । यास्ते अग्ने शिवास्तनुवः ( ) । ताभिस्त्वा ऽऽदधे । यास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ । **58 (13)**

*(चतुष्पदे – जिन्वतां – तनुव स्त्रीणि च ) (A7)*

## 1.1.8 अनुवाकं 8 – एतद्ब्राह्मणं

**1.1.8.1**

इमे वा एते लोका अग्नयः । ते यदव्यावृत्ता आधीयेरन्न् । शोचयेयुर्–यजमानम् । घर्मः शिर इति गार्.हपत्य–मादधाति । वातः प्राण इत्यन्वाहार्य–पचनम् । अर्क–श्चक्षुरित्या–हवनीयम् । तेनैवैनान् व्यावर्तयति । तथा न शोचयन्ति यजमानम् ।

रथन्तर–मभिगायते गार्.हपत्य आधीयमाने ।
राथन्तरो वा अयं ँल्लोकः । **59 (10)**

**1.1.8.2**

अस्मिन्नेवैनं ँल्लोके प्रतिष्ठित–माधत्ते । वामदेव्य–मभिगायत
उद्ध्रियमाणे । अन्तरिक्षं ँवै वामदेव्यम् । अन्तरिक्ष एवैनं प्रतिष्ठित–
माधत्ते । अथो शान्तिर् वै वामदेव्यम् । शान्तमेवैनं पशव्यमुद्धरते ।
बृहदभिगायत आहवनीय आधीयमाने । बार्.हतो वा असौ लोकः ।
अमुष्मिन्नेवैनं ँल्लोके प्रतिष्ठित–माधत्ते ।
प्रजापति–रग्नि–मसृजत । **60 (10)**

**1.1.8.3**

सोऽश्वो वारो भूत्वा पराङैत् । तं ँवारवन्तीयेनावारयत ।
तद्–वारवन्तीयस्य वारवन्तीयत्वम् । श्यैतेन श्येती अकुरुत ।
तच्छ्यैतस्य श्यैतत्वम् । यद्–वारवन्तीय–मभिगायते ।
वारयित्वैवैनं प्रतिष्ठित–माधत्ते । श्यैतेन श्येती कुरुते । घर्मः शिर
इति गार्.हपत्य–मादधाति । सशीर्.षाण–मेवैन–माधत्ते । **61 (10)**

**1.1.8.4**

उपैनमुत्तरो यज्ञो नमति । रुद्रो वा एषः । यदग्निः ।
स आधीयमान ईश्वरो यजमानस्य पशून् हिꣳसितोः ।
सं प्रियः पशुभिर् भुवदित्याह । पशुभिरेवैनꣳ संप्रियं करोति ।
पशूना-महिꣳसायै । छर्दिस्तोकाय तनयाय यच्छेत्याह ।
आशिषमेवैता-माशास्ते । वातः प्राण इत्यन्वाहार्य-पचनम् । **62 (10)**

**1.1.8.5**

सप्राण-मेवैन-माधत्ते । स्वदितं तोकाय तनयाय पितुं पचेत्याह ।
अन्नमेवास्मै स्वदयति । प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह ।
विभक्तिरेवैनयोस्सा । अथो नाना वीर्यावेवैनौ कुरुते ।
ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याह । आशिषमेवैतामाशास्ते ।
अर्क-श्चक्षुरित्या-हवनीयम् । अर्को वै देवानामन्नम् । **63 (10)**

**1.1.8.6**

अन्नमेवाव रुन्धे । तेन मे दीदिहीत्याह । समिन्ध एवैनम् । आनशे
व्यानश इति त्रिरुदिङ्गयति । त्रय इमे लोकाः । एष्वेवैनं ँल्लोकेषु
प्रतिष्ठित-माधत्ते । तत्-तथा न कार्यम् । वीङ्गितम प्रतिष्ठित-मादधीत ।
उद्धृत्यै-वाधाया-भिमन्त्रियः । अवीङ्गित-मेवैनं प्रतिष्ठित-

माधत्ते ( )। विराट् च स्वराट् च यास्ते अग्ने शिवास्तनुव-
स्ताभिस्त्वा ऽऽदध इत्याह । एता वा अग्नेः शिवास्तनुवः ।
ताभिरेवैनꣳ समर्धयति । यास्ते अग्ने घोरास्तनुव स्ताभिरमुं गच्छेति
ब्रूयाद्यं द्विष्यात् । ताभिरेवैनं पराभावयति । **64 (15)**

*(लोको - ऽसृजतैन - माधत्ते - ऽन्वाहार्यपचनं - देवानामन्न - मेनं प्रतिष्ठितमाधत्ते पञ्च च) (A8)*

## 1.1.9 अनुवाकं 9 – ब्रह्मौदनम्

**1.1.9.1**

शमीगर्भादग्निं मन्थति । एषा वा अग्नेर्-यज्ञिया तनूः । तामेवास्मै
जनयति । अदितिः पुत्रकामा । साध्येभ्यो देवेभ्यो ब्रह्मौदन-मपचत् ।
तस्या उच्छेषण-मददुः । तत् प्राश्ञात् । सा रेतोऽधत्त ।
तस्यै धाता चार्यमा चाजायेताम् । सा द्वितीय-मपचत् । **65 (10)**

**1.1.9.2**

तस्या उच्छेषण-मददुः । तत् प्राश्ञात् । सा रेतोऽधत्त । तस्यै मित्रश्च
वरुणश्चाजायेताम् । सा तृतीय-मपचत् । तस्या उच्छेषण-मददुः ।
तत् प्राश्ञात् । सा रेतोऽधत्त । तस्या अꣳशश्च भगश्चाजायेताम् ।

सा चतुर्थ–मपचत् । 66 (10)

1.1.9.3

तस्या उच्छेषण–मददुः । तत् प्राश्ञात् । सा रेतोऽधत्त ।

तस्या इन्द्रश्च विवस्वाꣳश्चा–जायेताम् । ब्रह्मौदनं पचति ।

रेत एव तद्–दधाति । प्राश्ञन्ति ब्राह्मणा ओदनम् । यदाज्य–

मुच्छिष्यते । तेन समिधोऽभ्यज्यादधाति ।

उच्छेषणाद्वा अदिती रेतोऽधत्त । 67 (10)

1.1.9.4

उच्छेषणादेव तद्–रेतो धत्ते । अस्थि वा एतत् । यथ्–समिधः ।

एतद्–रेतः । यदाज्यम् । यदाज्येन समिधोऽभ्यज्यादधाति ।

अस्थ्येव तद्–रेतसि दधाति । तिस्र आदधाति मिथुनत्वाय ।

इयतीर् भवन्ति । प्रजापतिना यज्ञमुखेन संमिताः । 68 (10)

1.1.9.5

इयतीर् भवन्ति । यज्ञपरुषा संमिताः । इयतीर् भवन्ति । एतावद्वै

पुरुषे वीर्यम् । वीर्य संमिताः । आर्द्रा भवन्ति ।

आर्द्रमिव हि रेतः सिच्यते । चित्रियस्याश्वत्थस्यादधाति ।

चित्रमेव भवति । घृतवतीभि–रादधाति । 69 (10)

**1.1.9.6**

एतद्वा अग्नेः प्रियं धाम । यद्-घृतम् । प्रियेणैवैनं धाम्ना समर्धयति ।
अथो तेजसा । गायत्रीभिर्-ब्राह्मणस्यादध्यात् । गायत्रछन्दा वै
ब्राह्मणः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । त्रिष्टुग्भी-राजन्यस्य ।
त्रिष्टुप् छन्दा वै राजन्यः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । **70 (10)**

**1.1.9.7**

जगतीभिर्-वैश्यस्य । जगती छन्दा वै वैश्यः । स्वस्य छन्दसः
प्रत्ययनस्त्वाय । त॒ँ संँवथ्सरं गोपायेत् । संँवथ्सर॒ँ हि रेतो हितं
ँवर्धते । यद्-येन॒ँ संँवथ्सरे नोपनमेत् । समिधः पुनरादध्यात् ।
रेत एव तद्धितं ँवर्धमानमेति । न मा॒ँस-मश्नीयात् ।
न स्त्रियमुपेयात् । **71 (10)**

**1.1.9.8**

यन् मा॒ँस-मश्नीयात् । यथ्स्त्रिय-मुपेयात् । निर्वीर्यः स्यात् ।
नैनमग्नि-रुपनमेत् । श्व आधास्यमानो ब्रह्मौदनं पचति ।
आदित्या वा इत उत्तमाः सुवर्गं ँलोकमायन्न् । ते वा इतो यन्तं
प्रतिनुदन्ते । एते खलु वावादित्याः । यद्-ब्राह्मणाः ।

तैरेव संत्वं गच्छति । 72 (10)

**1.1.9.9**

नैनं प्रतिनुदन्ते । ब्रह्मवादिनो वदन्ति । क्वा सः । अग्निः कार्यः ।
योऽस्मै प्रजां पशून् प्रजनयतीति । शल्कैस्ताꣳ रात्रिमग्नि-मिन्धीत ।
तस्मिन्-नुपव्युषमरणी निष्टपेत् । यथर्.षभाय वाशिता न्याविच्छायति ।
तादृगेव तत् । अपोदूह्य भस्माग्निं मन्थति । 73 (10)

**1.1.9.10**

सैव साऽग्नेः सन्ततिः । तं मथित्वा प्राञ्चमुद्धरति । सँवथ्सरमेव
तद्-रेतो हितं प्रजनयति । अनाहित-स्तस्याग्नि-रित्याहुः ।
यः समिधोऽनाधायाग्नि-माधत्त इति । ताः सँवथ्सरे पुरस्ता-
दादध्यात् । सँवथ्सरादेवैन-मवरुध्या-धत्ते । यदि सँवथ्सरे
ऽनादध्यात् । द्वादश्यां पुरस्ता-दादध्यात् । सँवथ्सर प्रतिमा वै द्वादश
रात्रयः ( ) । सँवथ्सरमेवास्याहिता भवन्ति । यदि द्वादश्यां नादध्यात् ।
त्र्यहे पुरस्तादादध्यात् । आहिता एवास्य भवन्ति । 74 (14)

*(द्वितीयमपचच् - चतुर्थमपच - ददिती रेतोऽधत्त - संमिता -
घृतवतीभिरादधाति - राजन्यः स्वस्य छन्दसः प्रत्ययनस्त्वा -*

*येयाद् – गच्छति – मन्थति – रात्रय श्चत्वारि च) (A9)*

**1.1.10 अनुवाकं 10 – पञ्चाग्न्याधानम्**

**1.1.10.1**

प्रजापतिः प्रजा असृजत । स रिरिचानोऽमन्यत । स तपोऽतप्यत ।
स आत्मन् वीर्य–मपश्यत् । तदवर्धत ।
तदस्माथ्–सहसोर्ध्व–मसृज्यत । सा विराडभवत् ।
तां देवासुरा व्यगृह्णत । सोऽब्रवीत् प्रजापतिः । मम वा एषा । **75 (10)**

**1.1.10.2**

दोहा एव युष्माकमिति । सा ततः प्राच्युदक्रामत् । तत् प्रजापतिः
पर्यगृह्णात् । अथर्व पितुं मे गोपायेति । सा द्वितीय–मुदक्रामत् ।
तत् प्रजापतिः पर्यगृह्णात् । नर्य प्रजां मे गोपायेति । सा तृतीय–
मुदक्रामत् । तत् प्रजापतिः पर्यगृह्णात् । श॒ꣳस्य पशून् मे
गोपायेति । **76 (10)**

**1.1.10.3**

सा चतुर्थ–मुदक्रामत् । तत् प्रजापतिः पर्यगृह्णात् । सप्रथ सभां मे
गोपायेति । सा पञ्चम–मुदक्रामत् । तत् प्रजापतिः पर्यगृह्णात् ।

अहे बुध्निय मन्त्रं मे गोपायेति । अग्नीन् वाव सा तान् व्यक्रमत ।
तान् प्रजापतिः पर्यगृह्णात् । अथो पङ्क्तिमेव ।
पङ्क्तिर्वा एषा ब्राह्मणे प्रविष्टा । **77 (10)**

**1.1.10.4**

तामात्मनोऽधि निर्मिमीते । यदग्नि–राधीयते । तस्मा–देतावन्तो–ऽग्नय
आधीयन्ते । पाङ्क्तं ँवा इद९ँ सर्वम् । पाङ्क्तेनैव पाङ्क्त९ँ स्पृणोति ।
अथर्व पितुं मे गोपायेत्याह । अन्नमेवै तेन स्पृणोति ।
नर्य प्रजां मे गोपायेत्याह । प्रजामेव तेन स्पृणोति ।
श९ँस्य पशून् मे गोपायेत्याह । **78 (10)**

**1.1.10.5**

पशूनेवैतेन स्पृणोति । सप्रथ सभां मे गोपायेत्याह ।
सभामेवैतेनैन्द्रिय९ँ स्पृणोति । अहे बुध्निय मन्त्रं मे गोपायेत्याह ।
मन्त्रमेवै तेन श्रिय९ँ स्पृणोति । यदन्वाहार्य–पचनेऽन्वाहार्यं पचन्ति ।
तेन सोऽस्याभीष्टः प्रीतः । यद्–गार्.हपत्य आज्यमधिश्रयन्ति
संपत्नीर्याजयन्ति । तेन सोऽस्याभीष्टः प्रीतः ।
यदाहवनीये जुह्वति । **79 (10)**

**1.1.10.6**

तेन सोऽस्याभीष्टः प्रीतः । यथ्सभायां ँविजयन्ते । तेन सोऽस्याभीष्टः प्रीतः । यदावसथेऽन्न॒ँ हरन्ति । तेन सोऽस्याभीष्टः प्रीतः । तथाऽस्य सर्वे प्रीता अभीष्टा आधीयन्ते । प्रवसथ–मेष्यन्नेव–मुपतिष्ठे–तैकमेकम् । यथा ब्राह्मणाय गृहेवासिने परिदाय गृहानेति । तादृगेव तत् । पुनराग–त्योपतिष्ठते ( ) । सा भागेयमेवैषां तत् । सा तत ऊर्ध्वाऽऽरोहत् । सा रोहिण्यभवत् । तद्–रोहिण्यै रोहिणित्वम् । रोहिण्या–मग्नि–मादधीत । स्व एवैनं ँयोनौ प्रतिष्ठित–माधत्ते । ऋध्नोत्येनेन । **80 (17)**

*(एषा – पशून्मे गोपायेति – प्रविष्टा – पशून्मे गोपायेत्याह – जुह्वति – तिष्ठते सप्त च) (A10)*

| **Prapaataka Korvai with starting Padams of 1 to 10 Anuvaakams :-** |
|---|
| ब्रह्म संधत्तं – कृत्तिका – सूद्धन्ति – द्वादशसु – प्रजापतिर् वाचो – देवासुरास्तदग्निर्नोद् – घर्मः शिर – इमे वै – शमीगर्भात् – प्रजापतिः स रिरिचानः सतपः स आत्मन् वीर्यं दश । |

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

ब्रह्म संधत्तं – तौ दिव्या – वथो शंत्वाय – प्राच्येषां – यँदुपर्युपरि – यथ् सद्यः – सोऽश्वो वारो भूत्वा – जगतीभि रशीतिः

**First and Last Padam of First Prapaatakam :-**

ब्रह्म संधत्त – मृद्ध्नोत्येनेन

। हरिः ओं ।

कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके

प्रथमः प्रपाठकः समाप्तः

## Details of Dasani & Vaakyams for Ashtakam 1 – Prapaatakam 1 – TB 1.1

| | Dasani | Vaakyams |
|---|---|---|
| Anuvakam 1 | 5 | 52 |
| Anuvakam 2 | 8 | 86 |
| Anuvakam 3 | 12 | 123 |
| Anuvakam 4 | 9 | 89 |
| Anuvakam 5 | 10 | 101 |
| Anuvakam 6 | 11 | 111 |
| Anuvakam 7 | 3 | 33 |
| Anuvakam 8 | 6 | 65 |
| Anuvakam 9 | 10 | 104 |
| Anuvakam 10 | 6 | 67 |
| Total → | 80 | 831 |

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टकं

## 1.2 प्रथमाष्टके द्वितीय प्रपाठकः – गवामयनब्राह्मणं

### 1.2.1 अनुवाकं 1 – आधानमन्त्राः पूर्वप्रपाठकशेषभूताः

**1.2.1.1**

उद्धन्यमान–मस्या अमेध्यम् । अप पाप्मानं यँजमानस्य हन्तु ।

शिवा नः सन्तु प्रदिशश्चतस्रः । शं नो माता पृथिवी तोकसाता ।

शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शं योँरभि स्रवन्तु नः ।

वैश्वानरस्य रूपम् । पृथिव्यां परिस्रसा । स्योन–माविशन्तु नः । **1 (10)**

**1.2.1.2**

यदिदं दिवो यददः पृथिव्याः । संजज्ञाने रोदसी संबभूवतुः । ऊषान्

कृष्णमवतु कृष्णमूषाः । इहोभयोर् यज्ञिय–मागमिष्ठाः । ऊतीः

कुर्वाणो यत् पृथिवीमचरः । गुहाकार–माखुरूपं प्रतीत्य । तत्

ते न्यक्तमिह संभरन्तः । शतं जीवेम शरदः सवीराः ।

ऊर्जं पृथिव्या रस-माभरन्तः । शतं जीवेम शरदः पुरूचीः । **2 (10)**

**1.2.1.3**

वम्रीभि-रनुवित्तं गुहासु । श्रोत्रं त उर्व्यबधिरा भवामः ।

प्रजापति सृष्टानां प्रजानाम् । क्षुधोपहत्यै सुवितं नो अस्तु ।

उपप्रभिन्नमिष-मूर्जं प्रजाभ्यः । सूदं गृहेभ्यो रसमाभरामि ।

यस्य रूपं बिभ्रदिमा-मविन्दत् । गुहा प्रविष्टाꣳ सरिरस्य मध्ये ।

तस्येदं ँविहत-माभरन्तः । अच्छंबट्कारमस्यां ँविधेम । **3 (10)**

**1.2.1.4**

यत् पर्यपश्यथ् सरिरस्य मध्ये । उर्वीमपश्य-ज्जगतः प्रतिष्ठाम् ।

तत् पुष्करस्यायतनाद्धि जातम् । पर्णं पृथिव्याः प्रथनꣳ हरामि ।

याभिरदृꣳहज्जगतः प्रतिष्ठाम् । उर्वीमिमां ँविश्वजनस्य भर्त्रीम् ।

ता नः शिवाः शर्कराः सन्तु सर्वाः । अग्ने रेतश्चन्द्रꣳ हिरण्यम् ।

अद्भ्यः संभूत-ममृतं प्रजासु । तथ् संभरन्नुत्तरतो निधाय । **4 (10)**

**1.2.1.5**

अति प्रयच्छं दुरितिं तरेयम् । अश्वो रूपं कृत्वा यदश्वत्थे ऽतिष्ठः ।

सँवथ्सरं देवेभ्यो निलाय । तत्ते न्यक्तमिह संभरन्तः ।

शतं जीवेम शरदः सवीराः । ऊर्जः पृथिव्या अध्युत्थितोऽसि ।
वनस्पते शतवल्.शो विरोह । त्वया वयमिषमूर्जं मदन्तः ।
रायस्पोषेण समिषा मदेम । गायत्रिया ह्रियमाणस्य यत्ते । **5 (10)**

**<u>1.2.1.6</u>**

पर्णमपतत् तृतीयस्यै दिवोऽधि । सोऽयं पर्णः सोमपर्णाद्धि जातः ।
ततो हरामि सोमपीथस्याव–रुद्ध्यै । देवानां ब्रह्मवादं ँवदतां ँयत् ।
उपाशृणोः सुश्रवा वै श्रुतोऽसि । ततो मामाविशतु ब्रह्मवर्चसम् ।
तथ् संभर७ स्तदवरुन्धीय साक्षात् । यया ते सृष्टस्याग्नेः ।
हेतिमशमयत् प्रजापतिः । तामिमाम प्रदाहाय । **6 (10)**

**<u>1.2.1.7</u>**

शमी७ँ शान्त्यै हराम्यहम् । यत्ते सृष्टस्य यतः । विकङ्कतं भा
आर्छज्जातवेदः । तया भासा संमितः । उरुं नो लोकमनु प्रभाहि ।
यत्ते तान्तस्य हृदयमाच्छिन्दन् जातवेदः । मरुतोऽद्भिस्तमयित्वा ।
एतत्ते तदशनेः संभरामि । सात्मा अग्ने सहृदयो भवेह ।
चित्रियादश्वत्थाथ् संभृता बृहत्यः । **7 (10)**

**1.2.1.8**

शरीरमभि स७ स्कृताः स्थ । प्रजापतिना यज्ञमुखेन संमिताः ।

तिस्रस् त्रिवृद्भिर् मिथुनाः प्रजात्यै । अश्वत्था-द्धव्यवाहा-द्धि जाताम् ।

अग्ने स्तनूँ यज्ञिया७ संभरामि । शान्तयोनि७ शमीगर्भम् ।

अग्नये प्रजनयितवे । यो अश्वत्थः शमीगर्भः । आरुरोह त्वे सचा ।

तं ते हरामि ब्रह्मणा । **8 (10)**

**1.2.1.9**

यज्ञियैः केतुभिः सह । यं त्वा समभरन्-जातवेदः । यथा शरीरं

भूतेषु न्यक्तम् । स संभृतः सीद शिवः प्रजाभ्यः । उरुं नो

लोकमनुनेषि विद्वान् । प्र वेधसे कवये मेध्याय । वचो वन्दारु

वृषभाय वृष्णे । यतो भयमभयं तन्नो अस्तु । अव देवान्.

यजे हेड्यान् । समिधाऽग्निं दुवस्यत । **9 (10)**

**1.2.1.10**

घृतैर् बोधयतातिथिम् । आऽस्मिन्. हव्या जुहोतन । उप त्वाऽग्ने

हविष्मतीः । घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम ।

तं त्वा समिद्भिरङ्गिरः । घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ।

समिध्यमानः प्रथमो नु धर्मः । समक्तुभिरज्यते विश्ववारः । **10 (10)**

**1.2.1.11**

शोचिष्केशो घृतनिर्णिक्–पावकः । सुयज्ञो अग्निर् यजथाय देवान् ।

घृतप्रतीको घृतयोनिरग्निः । घृतैः समिद्धो घृतमस्यान्नम् ।

घृतप्रुषस्त्वा सरितो वहन्ति । घृतं पिबन्थ् सुयजा यक्षि देवान् ।

आयुर्दा अग्ने हविषो जुषाणः । घृत प्रतीको घृतयोनिरेधि ।

घृतं पीत्वा मधुचारु गव्यम् । पितेव पुत्रमभि रक्षतादिमम् । **11 (10)**

**1.2.1.12**

त्वामग्ने समिधानं ँयविष्ठ । देवा दूतं चक्रिरे हव्यवाहम् । उरुज्रयसं

घृतयोनि–माहुतम् । त्वेषं चक्षुर्दधिरे चोदयन्वति । त्वामग्ने प्रदिव

आहुतं घृतेन । सुम्नायवः सुषमिधा समीधिरे ।

स वावृधान ओषधीभिरुक्षितः । उरुज्रयाꣳसि पार्थिवा वितिष्ठसे ।

घृत प्रतीकं ँव ऋतस्य धूर्.षदम् । अग्निं मित्रन्न समिधान ऋञ्जते ।

**12 (10)**

**1.2.1.13**

इन्धानो अक्रो विदथेषु दीद्यत् । शुक्रवर्णामुदु नो य॒ꣳसते धियम् ।
प्रजा अग्ने सँवासय । आशाश्च पशुभिः सह ।
राष्ट्राण्यस्मा आधेहि । यान्यासन्थ् सवितुः सवे । मही विश्पत्नी
सदने ऋतस्य । अर्वाची एतं धरुणे रयीणाम् । अन्तर्वत्नी
जन्यं जातवेदसम् । अध्वराणां जनयथः पुरोगाम् । **13 (10)**

**1.2.1.14**

आरोहतं दशत॒ꣳ शक्वरीर् मम । ऋतेनाग्न आयुषा वर्चसा सह ।
ज्योग् जीवन्त उत्तरामुत्तरा॒ꣳ समाम् । दर्.शमहं पूर्णमासं ँयज्ञं ँयथा
यजै । ऋत्वियवती स्थो अग्निरेतसौ । गर्भं दधाथां ते वामहं ददे ।
तथ् सत्यं ँयद् वीरं बिभृथः । वीरं जनयिष्यथः । ते मत् प्रातः
प्रजनिष्येथे । ते मा प्रजाते प्रजनयिष्यथः । **14 (10)**

**1.2.1.15**

प्रजया पशुभिर्-ब्रह्मवर्चसेन सुवर्गे लोके । अनृताथ्-सत्यमुपैमि ।
मानुषा-द्दैव्य-मुपैमि । दैवीं ँवाचं ँयच्छामि । शल्कैरग्निमिन्धानः ।

उभौ लोकौ सनेमहम् । उभयोर्-लोकयोर्. ऋद्ध्वा ।
अति मृत्युं तराम्यहम् । जातवेदो भुवनस्य रेतः ।
इह सिञ्च तपसो यज्जनिष्यते । **15 (10)**

**1.2.1.16**

अग्निमश्वत्थादधि हव्यवाहम् । शमीगर्भा–ज्जनयन्यो मयो भूः ।
अयं ते योनिर्. ऋत्वियः । यतो जातो अरोचथाः । तं जानन्नग्न
आरोह । अथा नो वर्धया रयिम् । अपेत वीत वि च सर्पतातः ।
येऽत्र स्थ पुराणा ये च नूतनाः । अदादिदं यँमोऽवसानं
पृथिव्याः । अक्रन्निमं पितरो लोकमस्मै । **16 (10)**

**1.2.1.17**

अग्नेर्भस्मास्यग्नेः पुरीषमसि । संज्ञानमसि कामधरणम् ।
मयि ते कामधरणं भूयात् । सं वँः सृजामि हृदयानि ।
स२ँ सृष्टं मनो अस्तु वः । स२ँ सृष्टः प्राणो अस्तु वः ।
सं याँ वः प्रियास्तनुवः । संप्रिया हृदयानि वः ।
आत्मा वो अस्तु संप्रियः । संप्रिया–स्तनुवो मम । **17 (10)**

**1.2.1.18**

कल्पेतां द्यावापृथिवी । कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथक् । मम ज्यैष्ठ्याय सव्रताः । येऽग्नयः समनसः । अन्तरा द्यावापृथिवी । वासन्तिकावृतू अभि कल्पमानाः । इन्द्रमिव देवा अभि सँविशन्तु । दिवस्त्वा वीर्येण । पृथिव्यै–महिम्ना । **18 (10)**

**1.2.1.19**

अन्तरिक्षस्य पोषेण । सर्वपशु–मादधे । अजीजनन्–नमृतं मर्त्यासः । अस्रेमाणं तरणिं ँवीडुजम्भम् । दश स्वसारो अग्रुवः समीचीः । पुमाꣳसं जातमभि सꣳरभन्ताम् । प्रजापतेस्त्वा प्राणेनाभि प्राणिमि । पूष्णः पोषेण मह्यम् । दीर्घायुत्वाय शतशारदाय । शतꣳ शरद्भ्य आयुषे वर्चसे । **19 (10)**

**1.2.1.20**

जीवात्वै पुण्याय । अहं त्वदस्मि मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने । पुत्रः पित्रे लोकक्–ज्जातवेदः । प्राणे त्वा ऽमृतमादधामि । अन्नादमन्नाद्याय ।

गोप्तारं गुप्त्यै । सुगार्.हपत्यो विदहन्नरातीः ।

उषसः श्रेयसीः श्रेयसीर् दधत् । **20 (10)**

**1.2.1.21**

अग्ने सपत्नाँ अप बाधमानः । रायस्पोष–मिषमूर्ज–मस्मासु धेहि ।

इमा उ मामुपतिष्ठन्तु रायः । आभिः प्रजाभिरिह सं वँसेय ।

इहो इडा तिष्ठतु विश्वरूपी । मध्ये वसोर् दीदिहि जातवेदः ।

ओजसे बलाय त्वोद्यच्छे । वृषणे शुष्मायायुषे वर्चसे ।

सपत्नतूरसि वृत्रतूः । यस्ते देवेषु महिमा सुवर्गः । **21 (10)**

**1.2.1.22**

यस्त आत्मा पशुषु प्रविष्टः । पुष्टिर्या ते मनुष्येषु पप्रथे ।

तया नो अग्ने जुषमाण एहि । दिवः पृथिव्याः पर्यन्तरिक्षात् ।

वातात् पशुभ्यो अध्योषधीभ्यः । यत्रयत्र जातवेदः सं बभूथ ।

ततो नो अग्ने जुषमाण एहि । प्राचीमनु प्रदिशं प्रेहि विद्वान् ।

अग्नेरग्ने पुरो अग्निर्–भवेह । विश्वा आशा दीद्यानो वि भाहि ।
**22 (10)**

**1.2.1.23**

ऊर्जं नो धेहि द्विपदे चतुष्पदे । अन्वग्निरुषसा-मग्र-मख्यत् ।
अन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीन् ।
अनु द्यावापृथिवी आततान । विक्रमस्व महा॒ँ असि । वेदिषन्-
मानुषेभ्यः । त्रिषु लोकेषु जागृहि । यदिदं दिवो यददः पृथिव्याः ।
सं ँविदाने रोदसी सं बभूवतुः । **23 (10)**

**1.2.1.24**

तयोः पृष्ठे सीदतु जातवेदाः । शंभूः प्रजाभ्य-स्तनुवे स्योनः ।
प्राणं त्वाऽमृत आदधामि । अन्नादमन्नाद्याय । गोप्तारं गुप्त्यै ।
यत्ते शुक्र शुक्रं ँवर्चः शुक्रा तनूः । शुक्रं ज्योति-रजस्रम् ।
तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाऽऽग्ने ब्रह्मणा ।
आनशे व्यानशे सर्वमायुर् व्यानशे । **24 (10)**

**1.2.1.25**

नर्य प्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्यमाणां च ।
अमृते सत्ये प्रतिष्ठिताम् । अथर्व पितुं मे गोपाय । रसमन्नमिहायुषे ।

अदब्धायो-ऽशीततनो । अविषं नः पितुं कृणु । श७स्य पशून् मे गोपाय । द्विपादो ये चतुष्पदः । **25 (10)**

**1.2.1.26**

अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । सप्रथ सभां मे गोपाय । ये च सभ्याः सभासदः । तानिन्द्रियावतः कुरु । सर्वमायु-रुपासताम् । अहेबुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजू७षि । सा हि श्रीरमृता सताम् । **26 (10)**

**1.2.1.27**

चतुः शिखण्डा युवतिः सुपेशाः । घृतप्रतीका भुवनस्य मध्ये । मर्मृज्यमाना महते सौभगाय । मह्यं धुक्ष्व यजमानाय कामान् । इहैव सन्तत्र सतो वो अग्नयः । प्राणेन वाचा मनसा बिभर्मि । तिरो मा सन्तमायुर्मा प्रहासीत् । ज्योतिषा वो वैश्वानरे-णोपतिष्ठे । पञ्चधाऽग्नीन्-व्यक्रामत् । विराट्थ् सृष्टा प्रजापतेः ( ) । ऊर्ध्वाऽऽरोहद्-रोहिणी । योनिरग्नेः प्रतिष्ठितिः । **27 (12)**

*(विशन्तु नः – पुरुचीर् – विधेम – निधाय – यत् ते –*

*ऽप्रदाहाय – बृहत्यो – ब्रह्मणा – दुवस्यत – विश्ववार – इम – मृञ्जते – पुरोगां – प्रजनयिष्यथो – जनिष्यतेऽ – स्मै – मम – महिम्ना – वर्चसे – दधथ् – सुवर्गा – भाहि – संबभूवतु – रायु र् व्यानशे – चतुष्पदः – सतां – प्रजापतेर् द्वे च) (A1)*

**1.2.2** अनुवाकं **2** – विषूवन्नामकं मुख्यमह, तदुभयपार्श्ववर्तीनि चत्वार्यहानि चोच्यन्ते

**1.2.2.1**

नवैतान्यहानि भवन्ति । नव वै सुवर्गा लोकाः ।

यदेतान्यहा–न्युपयन्ति । नवस्वेव तथ् सुवर्गेषु लोकेषु सत्रिणः

प्रतितिष्ठन्तो यन्ति । अग्निष्टोमाः परः सामानः कार्या इत्याहुः ।

अग्निष्टोमसंमितः सुवर्गो लोक इति । द्वादशा–ग्निष्टोमस्य स्तोत्राणि ।

द्वादश मासाः सँवथ्सरः । तत् तन्न सूक्ष्र्यम् । उक्थ्या एव सप्तदशाः

परः सामानः कार्याः । **28 (10)**

**1.2.2.2**

पशवो वा उक्थानि । पशूनामव–रुध्यै । विश्वजिदभिजिता–

वग्निष्टोमौ । उक्थ्याः सप्तदशाः परः सामानः । ते स७स्तुता

विराजमभि संपद्यन्ते । द्वे चर्चावति रिच्येते । एकया गौरतिरिक्तः ।

एकयाऽऽयुरूनः । सुवर्गो वै लोको ज्योतिः । ऊर्ग् विराट् । **29 (10)**

**1.2.2.3**

सुवर्गमेव तेन लोकमभि जयन्ति । यत् पर९ राथन्तरम् ।

तत् प्रथमेऽहन्–कार्यम् । बृहद्–द्वितीये । वैरूपं तृतीये ।

वैराजं चतुर्थे । शाक्वरं पञ्चमे । रैवत९ षष्ठे ।

तदु पृष्ठेभ्यो नयन्ति । संतनय एते ग्रहा गृह्यन्ते । **30 (10)**

**1.2.2.4**

अतिग्राह्याः परः सामसु । इमानेवैतैर् लोकान्थ् संतन्वन्ति ।

मिथुना एते ग्रहा गृह्यन्ते । अतिग्राह्याः परः सामसु ।

मिथुनमेव तैर् यजमाना अवरुन्धते । बृहत् पृष्ठं भवति ।

बृहद् वै सुवर्गो लोकः । बृहतैव सुवर्गं ँलोकं ँयन्ति ।

त्रयस्त्रि९्शि नाम साम । माध्यन्दिने पवमाने भवति । **31 (10)**

**1.2.2.5**

त्रयस्त्रि९्शद्वै देवताः । देवता एवावरुन्धते । ये वा इतः पराञ्च९्

सँवथ्सर–मुप यन्ति । न हैनं ते स्वस्ति समश्नुवते ।

अथ येऽमुतोऽर्वाञ्चमुप यन्ति । ते हैन॑ स्वस्ति समश्नुवते ।

एतद्वा अमुतोऽर्वाञ्चमुप यन्ति । यदेवम् । यो ह खलु वाव प्रजापतिः ।

स उ वेवेन्द्रः ( ) । तदु देवेभ्यो नयन्ति । **32 (11)**

*(कार्या-विराड् - गृह्यन्ते - पवमाने भवती - न्द्र एकं च) (A2)*

## 1.2.3 अनुवाकं 3 – विषुवद्दिनेऽतिग्राह्यविशेषाः

**1.2.3.1**

संततिर्वा एते ग्रहाः । यत् परः सामानः । विषूवान्-दिवाकीर्त्यम् ।

यथा शालायै पक्षसी । एव॒ँ सँवथ्सरस्य पक्षसी । यदेतेन गृह्येरन्न् ।

विषूची सँवथ्सरस्य पक्षसी व्यवस्र॒ँ सेयाताम् । आर्तिमार्च्छेयुः ।

यदेते गृह्यन्ते । यथा शालायै पक्षसी मध्यमं-॒ँव॒ँशमभि

समायच्छति । **33 (10)**

**1.2.3.2**

एव॒ँ सँवथ्सरस्य पक्षसी दिवाकीर्त्यमभि संतन्वन्ति ।

नार्तिमार्च्छन्ति । एकवि॒ँश-महर्भवति । शुक्राग्रा ग्रहा गृह्यन्ते ।

प्रत्युत्तब्ध्यै सयत्वाय । सौर्य एतदहः पशुरालभ्यते । सौर्योऽतिग्राह्यो

गृह्यते । अहरेव रूपेण समर्धयन्ति । अथो अह्न एवैष बलिर्

ह्रियते । सप्तै–तदहरति–ग्राह्या गृह्यन्ते । **34 (10)**

**1.2.3.3**

सप्त वै शीर्.षण्याः प्राणाः । असावादित्यः शिरः प्रजानाम् ।

शीर्.षन्नेव प्रजानां प्राणान् दधाति । तस्माथ्सप्त शीर्.षन् प्राणाः ।

इन्द्रो वृत्रꣳ हत्वा । असुरान् पराभाव्य । स इमान् लोका–नभ्यजयत् ।

तस्यासौ लोकोऽनभिजित आसीत् । तँ विश्वकर्मा भूत्वाऽभ्यजयत् ।

यद्–वैश्वकर्मणो गृह्यते । **35 (10)**

**1.2.3.4**

सुवर्गस्य लोकस्या–भिजित्यै । प्र वा एतेऽस्माल् लोका–च्च्यवन्ते ।

ये वैश्वकर्मणं गृह्णते । आदित्यश्श्वो गृह्यते । इयं वा अदितिः ।

अस्यामेव प्रतितिष्ठन्ति । अन्योन्यो गृह्येते । विश्वान्येवान्येन कर्माणि

कुर्वाणा यन्ति । अस्यामन्येन प्रति तिष्ठन्ति । तावाऽपरार्धाथ्

सँवथ्सरस्या–न्योन्यो गृह्येते ( ) । तावुभौ सह महाव्रते गृह्येते ।

यज्ञस्यैवान्तं गत्वा । उभयोर् लोकयोः प्रति तिष्ठन्ति ।

अर्क्यमुक्थं भवति । अन्नाद्यस्या-वरुद्ध्यै। **36 (15)**

*(समायच्छ – त्यतिग्राह्या गृह्यन्ते – गृह्यते – सँवथ्सरस्थान्योन्यो गृह्येते पञ्च च ) (A3)*

**1.2.4** अनुवाकं **4** – तस्मिन्नेव दिने दिवाकीर्त्यनामानि सामानि

**1.2.4.1**

एकवि॒ꣳश एष भवति । एतेन वै देवा एकवि॒ꣳशेन । आदित्यमित उत्तमꣳ सुवर्गं ँलोक-मारोहयन्न् । स वा एष इत एकवि॒ꣳशः । तस्य दशावस्तादहानि । दश परस्तात् । स वा एष विराज्युभयतः प्रतिष्ठितः । विराजि हि वा एष उभयतः प्रतिष्ठितः । तस्मादन्तरेमौ लोकौ यन्न् । सर्वेषु सुवर्गेषु लोके-ष्वभितपन्नेति । **37 (10)**

**1.2.4.2**

देवा वा आदित्यस्य सुवर्गस्य लोकस्य । पराचोऽतिपादादबिभयुः । तं छन्दोभिरदृꣳ हन्धृत्यै । देवा वा आदित्यस्य सुवर्गस्य लोकस्य । अवाचोऽवपादादबिभयुः । तं पञ्चभी रश्मिभि-रुदवयन्न् । तस्मादेकवि॒ꣳशो ऽहन् पञ्च दिवाकीर्त्यानि क्रियन्ते । रश्मयो वै

दिवाकीर्त्यानि । ये गायत्रे । ते गायत्रीषूत्तरयोः पवमानयोः । **38 (10)**

**1.2.4.3**

महादिवाकीर्त्यꣳ होतुः पृष्ठम् । विकर्णं ब्रह्मसामम् । भासोऽग्निष्टोमः ।
अथैतानि पराणि । परैर्वै देवा आदित्यꣳ सुवर्गं ँलोकमपारयन्न् ।
यदपारयन्न् । तत् पराणां परत्वम् । पारयन्त्येनं पराणि । य एवं ँवेद ।
अथैतानि स्पराणि ( ) । स्परैर्वै देवा आदित्यꣳ सुवर्गं ँलोकमस्पारयन्न् ।
यदस्पारयन्न् । तथ् स्पराणाꣳ स्परत्वम् । स्पारयन्त्येनꣳ स्पराणि ।
य एवं ँवेद । **39 (15)** *(एति–पवमानयोः–स्पराणी पञ्च च) (A4)*

**1.2.5** <u>अनुवाकं 5 – पशवः वैष्णवाद्या नव</u>

**1.2.5.1**

अप्रतिष्ठां ँवा एते गच्छन्ति । येषाꣳ सँवथ्सरेऽनाप्तेऽथ ।
एकादशिन्याप्यते । वैष्णवं ँवामन–मालभन्ते । यज्ञो वै विष्णुः ।
यज्ञमेवालभन्ते प्रतिष्ठित्यै । ऐन्द्राग्न–मालभन्ते । इन्द्राग्नी वै
देवाना–मयातयामानौ । ये एव देवते अयातयाम्नी ।
ते एवालभन्ते । **40 (10)**

**1.2.5.2**

वैश्वदेव-मालभन्ते । देवता एवाव-रुन्धते । द्यावापृथिव्यां धेनु-
मालभन्ते । द्यावापृथिव्योरेव प्रति तिष्ठन्ति । वायव्यँ वथ्समालभन्ते ।
वायुरेवैभ्यो यथाऽऽयतनाद्-देवता अवरुन्धे ।
आदित्यामविँ वशा-मालभन्ते । इयँ वा अदितिः ।
अस्यामेव प्रति तिष्ठन्ति । मैत्रावरुणी-मालभन्ते । **41 (10)**

**1.2.5.3**

मित्रेणैव यज्ञस्य स्विष्टꣳ शमयन्ति । वरुणेन दुरिष्टम् ।
प्राजापत्यं तूपरं महाव्रत आलभन्ते । प्राजापत्योऽतिग्राह्यो गृह्यते ।
अहरेव रूपेण समर्धयन्ति । अथो अह्न एवैष बलिर् ह्रियते ।
आग्नेयमालभन्ते प्रति प्रज्ञात्यै । अजपेत्वान्. वा एते पूर्वैर्मासैर-
वरुन्धते । यदेते गव्याः पशव आलभ्यन्ते ।
उभयेषां पशूना-मवरुध्यै ( ) । **42 (10)**

**1.2.5.4**

यदतिरिक्ता–मेकादशिनी–मालभेरन्न् । अप्रियं भ्रातृव्य–मभ्यतिरिच्येत । यद् द्वौद्वौ पशू समस्येयुः । कनीय आयुः कुर्वीरन्न् । यदेते ब्राह्मणवन्तः पशव आलभ्यन्ते । नाप्रियं भ्रातृव्य–मभ्यतिरिच्यते । न कनीय आयुः कुर्वते । **43 (7)**

*(ते–एवालभन्ते–मैत्रावरुणीमालभन्ते–ऽवरुध्यै–+सप्त च) (A5)*

## 1.2.6 अनुवाकं 6 – महाव्रतम्

**1.2.6.1**

प्रजापतिः प्रजाः सृष्ट्वा वृत्तोऽशयत् । तं देवा भूताना॒ं रसं तेजः संभृत्य । तेनैनमभिषज्यन्न् । महानववर्तीति । तन् महाव्रतस्य महाव्रतत्वम् । महद्–व्रतमिति । तन् महाव्रतस्य महाव्रतत्वम् । महतो व्रतमिति । तन् महाव्रतस्य महाव्रतत्वम् । पञ्चवि॒ंशः स्तोमो भवति । **44 (10)**

**1.2.6.2**

चतुर्वि॒ꣳश–त्यर्धमासः सँवथ्स॒रः । यद् वा ए॒तस्मिन्थ् सँवथ्स॒रे ऽधिप्राजायत । तदन्नं पञ्चवि॒ꣳश–मभवत् । म॒ध्य॒तः क्रियते । म॒ध्य॒तो ह्यन्नमशि॒तं धि॒नोति । अथो मध्यत ए॒व प्र॒जानामूर्ग्धीयते । अथ यद्वा इ॒दमन्त॒तः क्रि॒यते । तस्मादुदन्ते प्र॒जाः समेधन्ते । अ॒न्त॒तः क्रियते प्र॒जननायै॒व । त्रि॒वृच्छिरो भवति । **45 (10)**

**1.2.6.3**

त्रे॒धा वि॒हित॒ꣳ हि शिरः । लोम छ॒वीरस्थि । पराचा स्तुवन्ति । तस्मा॒त् तथ् स॒दृ॒गेव । न मे॒द्यतोऽनु मेद्यति । न कृ॒श्यतोऽनु कृश्यति । प॒ञ्च॒दशोऽन्यः प॒क्षो भवति । स॒प्त॒दशोऽन्यः । तस्मा॒द्–वया॒ꣳस्य–न्यत॒ र॒र्ध॒मभि प॒र्यावर्तन्ते । अ॒न्य॒त॒रतो हि तद्–गरीयः क्रि॒यते । **46 (10)**

**1.2.6.4**

प॒ञ्च॒वि॒ꣳश आ॒त्मा भवति । तस्मान्–मध्य॒तः प॒शवो॒ वरिष्ठाः । ए॒क॒वि॒ꣳशं पुच्छम् । द्वि॒पदासु स्तुव॒न्ति प्रतिष्ठित्यै । सर्वेण स॒ह स्तुवन्ति । सर्वे॒ण ह्यात्मना॒ऽऽत्मन्वी । स॒होत्पतन्ति । एकै॒का–मुच्छि॒ꣳषन्ति । आ॒त्मन्न्. ह्यङ्गानि ब॒द्धानि ।

न वा एतेन सर्वः पुरुषः । **47 (10)**

**1.2.6.5**

यदित इतो लोमानि दतो नखान् । परिमादः क्रियन्ते । तान्येव तेन प्रत्युप्यन्ते । औदुम्बरस्तल्पो भवति । ऊर्ग्वा अन्नमुदुम्बरः । ऊर्ज एवान्नाद्यस्या–वरुद्ध्यै। यस्य तल्पसद्य–मनभिजित৺ स्यात् । स देवाना৺ साम्यक्षे । तल्पसद्य–मभिजयानीति तल्पमा–रुह्योद्–गायेत् । तल्पसद्य–मेवाभिजयति । **48 (10)**

**1.2.6.6**

यस्य तल्पसद्य–मभिजित৺ स्यात् । स देवाना৺ साम्यक्षे । तल्पसद्यं मा पराजेषीति तल्प–मारुह्योद्–गायेत् । न तल्पसद्यं पराजयते । प्लेङ्खे श৺सति । महो वै प्लेङ्खः । महस एवान्नाद्यस्या–वरुद्ध्यै । देवासुराः सँयत्ता आसन्न् । त आदित्ये व्यायच्छन्त । तं देवाः समजयन्न् । **49 (10)**

**1.2.6.7**

ब्राह्मणश्च शूद्रश्च चर्मकर्ते व्यायच्छेते । दैव्यो वै वर्णो ब्राह्मणः । असुर्यः शूद्रः । इमेऽराथ् सुरिमे सुभूत–मक्र–न्नित्यन्यतरो ब्रूयात् ।

इम उद्वासीकारिण इमे दुर्भूत-मक्रन्नित्यन्यतरः । यदेवैषाꣳ सुकृतं

ँया राद्धिः । तदन्यतरो-ऽभिश्रीणाति । यदेवैषां दुष्कृतं ँयाऽराद्धिः ।

तदन्यतरो-ऽपहन्ति । ब्राह्मणः सं जयति ( ) ।

अमुमेवादित्यं भ्रातृव्यस्य सँविन्दन्ते । **50 (11)**

*(भवति - भवति - क्रियते - पुरुषो - जयत्य - जय - ञ्जय त्येकं च) (A6)*

| |
|---|
| **Prapaataka Korvai with starting Padams of 1 to 6 Anuvaakams :-** |
| उद्ध्यन्यमानं - नवैतानि - सन्तति - रेकविꣳश एषो - ऽप्रतिष्ठां - प्रजापतिर् वृत्तः षट् |

| |
|---|
| **Korvai with starting Padams of 1, 11, 21 Series of dasanees :-** |
| उद्धन्यमानꣳ - शोचिष्केशो - ऽग्ने सपत्ना - नतिग्राह्या - वैश्वदेवमालभन्ते पञ्चाशत् |

**First and Last Padam of Second Prapaatakam :-**

उद्धन्यमान॒ꣳ – सँविन्दन्ते

हरिः ओं

कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे

प्रथमाष्टके द्विदीयः प्रपाठकः समाप्तः

---

## Details of Dasani & Vaakyams for Ashtakam 1 – Prapaatakam 2 – TB 1.2

| | Dasani | Vaakyams |
|---|---|---|
| **Anuvakam 1** | **27** | **272** |
| **Anuvakam 2** | **5** | **51** |
| **Anuvakam 3** | **4** | **45** |
| **Anuvakam 4** | **3** | **35** |
| **Anuvakam 5** | **4** | **37** |
| **Anuvakam 6** | **7** | **71** |
| **Total →** | **50** | **511** |

## 1.3 प्रथमाष्टके तृतीय प्रपाठकः – वाजपेयब्राह्मणं

### 1.3.1 अनुवाकं 1 – पुनराधेयशेषः आज्यभागयोर्विशेषः

**TB 1.3.1.1**

देवासुराः सं ँयत्ता आसन्न् । ते देवा विजय–मुपयन्तः ।
अग्नीषोमयो–स्तेजस्विनीस्तनूः सं न्यदधत । इदमु नो भविष्यति ।
यदि नो जेष्यन्तीति । तेनाग्नीषोमा–वपाक्रामताम् । ते देवा विजित्य ।
अग्नीषोमा–वन्वैच्छन्न् । तेऽग्नि–मन्वविन्दन्–नृतुषूथ् सन्नम् ।
तस्य विभक्तीभि–स्तेजस्विनीस्तनू–रवारुन्धत । **1 (10)**

**TB 1.3.1.2**

ते सोम–मन्वविन्दन्न् । तमघ्नन्न् । तस्य यथाऽभिज्ञायम् तनूर् व्यगृह्णत ।
ते ग्रहा अभवन्न् । तद्–ग्रहाणां ग्रहत्वम् । यस्यैवं ँविदुषो ग्रहा
गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेये कुर्यात् ।
यदनाग्नेयं पुनराधेये कुर्यात् । व्यृद्धमेव तत् । **2 (10)**

**TB 1.3.1.3**

अनाग्नेयं ँवा एतत् क्रियते । यथ् समिध–स्तनूनपातमिडो बर्.हिर्–
यजति । उभावाग्नेया–वाज्यभागौ स्याताम् ।
अनाज्यभागौ–भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति ।

अग्नये पवमानायोत्तरः स्यात् । यत् पवमानाय । तेनाज्य भागः ।
तेन सौम्यः । बुधन्वत्याग्नेय-स्याज्य-भागस्य पुरोऽनुवाक्या भवति ।
**3 (10)**

**TB 1.3.1.4**

यथा सुप्तं बोधयति । तादृगेव तत् । अग्निन्यक्ताः पत्नी
सँयाजानामृचः स्युः । तेनाग्नेय९ँ सर्वं भवति । एकधा
तेजस्विनीं देवता-मुपैतीत्याहुः । सैनमीश्वरा प्रदह इति ।
नेति ब्रूयात् । प्रजननं ँवा अग्निः । प्रजनन-मेवोपैतीति ।
कृतयजुः संभृत संभार इत्याहुः । **4 (10)**

**TB 1.3.1.5**

न संभृत्याः संभाराः । न यजुः कार्यमिति । अथो खलु ।
संभृत्या एव संभाराः । कार्यं ँयजुः । पुनराधेयस्य समृद्ध्यै ।
तेनोपा९ँशु प्रचरति । एष्य इव वा एषः । यत् पुन-राधेयः ।
यथोपा९ँशु नष्टमिच्छति । **5 (10)**

**TB 1.3.1.6**

तादृगेव तत् । उच्चैः स्विष्टकृतमुथ् सृजति । यथा नष्टं ँवित्वा
प्राहायमिति । तादृगेव तत् । एकधा तेजस्विनीं देवतामुपैतीत्याहुः ।

सैनमीश्वरा प्रदह इति । तत्तथा नोपैति । प्रयाजानूयाजेष्वेव विभक्तीः कुर्यात् । यथापूर्व-माज्यभागौ स्याताम् ।

एवं पत्नी सँयाजाः ( ) । **6 (10)**

**TB 1.3.1.7**

तद्-वैश्वानरवत्-प्रजननवत्तर-मुपैतीति । तदाहुः । व्यृद्धं वा एतत् । अनाग्नेयं वा एतत् क्रियत इति । नेति ब्रूयात् । अग्निं प्रथमं विभक्तीनां यजति । अग्निमुत्तमं पत्नी सम्याजानाम् । तेनाग्नेयम् । तेन समृद्धं क्रियत इति । **7 (9)**

*(अरुन्ध - तैव तद् - भवति - संभृतसंभार इत्याहु - रिच्छति - पत्नीसम्याजा - +नव च) (A1)*

## 1.3.2 अनुवाकं 2 - वाजपेयस्य विधिः

**TB 1.3.2.1**

देवा वै यथादर्.शं यज्ञानाहरन्त । योऽग्निष्टोमम् । य उक्थ्यम् । योऽतिरात्रम् । ते सहैव सर्वे वाजपेय-मपश्यन्न् । ते । अन्योन्यस्मै नातिष्ठन्त । अहमनेन यजा इति । तेऽब्रुवन्न् ।

आजिमस्य धावामेति । 8 (10)

**TB 1.3.2.2**

तस्मिन्-नाजिमधावन्न् । तं बृहस्पति-रुदजयत् । तेनायजत ।

स स्वाराज्य-मगच्छत् । तमिन्द्रोऽब्रवीत् । मामनेन याजयेति ।

तेनेन्द्र-मयाजयत् । सोऽग्रं देवतानां पर्यैत् । अगच्छथ्-स्वाराज्यम् ।

अतिष्ठन्तास्मै ज्यैष्ठ्याय । 9 (10)

**TB 1.3.2.3**

य एवं ँविद्वान्. वाजपेयेन यजते । गच्छति स्वाराज्यम् । अग्र॑ं

समानानां पर्येति । तिष्ठन्तेऽस्मै ज्यैष्ठ्याय । स वा एष ब्राह्मणस्य चैव

राजन्यस्य च यज्ञः । तं ँवा एतं ँवाजपेय इत्याहुः । वाजाप्यो वा

एषः । वाज॑ं ह्येतेन देवा ऐप्सन्न् । सोमो वै वाजपेयः ।

यो वै सोमं ँवाजपेयं ँवेद । 10 (10)

**TB 1.3.2.4**

वाज्येवैनं पीत्वा भवति । आऽस्य वाजी जायते । अन्नं ँवै वाजपेयः ।

य एवं ँवेद । अत्त्यन्नम् । आऽस्यान्नादो जायते । ब्रह्म वै वाजपेयः ।

य एवं ँवेद । अत्ति ब्रह्मणाऽन्नम् । आऽस्य ब्रह्मा जायते । 11 (10)

**TB 1.3.2.5**

वाग्वै वाजस्य प्रसवः । य एवं वेद । करोति वाचा वीर्यम् ।
ऐनं वाचा गच्छति । अपिवतीं वाचं वदति । प्रजापतिर् देवेभ्यो
यज्ञान् व्यादिशत् । स आत्मन् वाजपेय-मधत्त । तं देवा अब्रुवन्न् ।
एष वाव यज्ञः । यद्-वाजपेयः । **12 (10)**

**TB 1.3.2.6**

अप्येव नोऽत्रास्त्विति । तेभ्य एता उज्जितीः प्रायच्छत् । ता वा एता
उज्जितयो व्याख्यायन्ते । यज्ञस्य सर्वत्वाय । देवताना-मनिर्भागाय ।
देवा वै ब्रह्मणश्चान्नस्य च शमलमपाघ्नन्न् । यद्-ब्रह्मणः
शमलमासीत् । सा गाथा नाराशꣳस्य भवत् । यदन्नस्य ।
सा सुरा । **13 (10)**

**TB 1.3.2.7**

तस्माद्-गायतश्च मत्तस्य च न प्रतिगृह्यम् । यत् प्रतिगृह्णीयात् ।
शमलं प्रतिगृह्णीयात् । सर्वा वा एतस्य वाचो ऽवरुद्धाः ।
यो वाजपेययाजी । या पृथिव्यां याऽग्नौ या रथन्तरे । याऽन्तरिक्षे
या वायौ या वामदेव्ये । या दिवि याऽऽदित्ये या बृहति । याऽफ्सु
यौषधीषु या वनस्पतिषु । तस्माद् वाजपेययाज्यार्त्विजीनः ( ) ।

सर्वा ह्यस्य वाचो ऽवरुद्धाः । **14 (11)** *(धावामेति – ज्यैष्ठ्याय – वेद – ब्रह्मा जायते–वाजपेयः – सुरा – ऽऽर्त्विजीन एकं च ) (A2)*

## 1.3.3 अनुवाकं 3 – तस्यग्रहविशेषाः

**TB 1.3.3.1**

देवा वै यदन्यैर्–ग्रहैर्–यज्ञस्य नावारुन्धत । तदतिग्राह्यै–रतिगृह्या–वारुन्धत । तदतिग्राह्याणा–मतिग्राह्यत्वम् । यदतिग्राह्या गृह्यन्ते । यदेवान्यैर्–ग्रहैर् यज्ञस्य नावरुन्धे । तदेव तैरतिगृह्या–वरुन्धे । पञ्च गृह्यन्ते । पाङ्क्तो यज्ञः । यावानेव यज्ञः ।
तमाप्त्वा ऽवरुन्धे । **15 (10)**

**TB 1.3.3.2**

सर्व ऐन्द्रा भवन्ति । एकधैव यजमान इन्द्रियं दधति । सप्तदश प्राजापत्या ग्रहा गृह्यन्ते । सप्तदशः प्रजापतिः । प्रजापते–राप्त्यै । एकयर्चा गृह्णाति । एकधैव यजमाने वीर्यं दधाति ।
सोमग्रहाश्च सुराग्रहाश्च गृह्णाति । एतद् वै देवानां परममन्नम् ।
यथ् सोमः । **16 (10)**

**TB 1.3.3.3**

एतन् मनुष्याणाम् । यथ् सुरा । परमेणैवास्मा अन्नाद्येनावर-मन्नाद्य-मवरुन्धे । सोमग्रहान् गृह्णाति । ब्रह्मणो वा एतत् तेजः । यथ् सोमः । ब्रह्मण एव तेजसा तेजो यजमाने दधाति । सुराग्रहान् गृह्णाति । अन्नस्य वा एतच्छमलम् । यथ् सुरा । **17 (10)**

**TB 1.3.3.4**

अन्नस्यैव शमलेन शमलं ँयजमाना-दपहन्ति । सोमग्रहा७श्च सुराग्रहा७श्च गृह्णाति । पुमान्. वै सोमः । स्त्री सुरा । तन् मिथुनम् । मिथुनमेवास्य तद्-यज्ञे करोति प्रजननाय । आत्मानमेव सोमग्रहैः स्पृणोति । जाया७ँ सुरा ग्रहैः । तस्माद्-वाजपेययाज्यमुष्मिन् ँल्लोके स्त्रिय७ँ संभवति । वाजपेया-भिजित७ ह्यस्य । **18 (10)**

**TB 1.3.3.5**

पूर्वे सोमग्रहा गृह्यन्ते । अपरे सुराग्रहाः । पुरोक्ष७ँ सोमग्रहान्थ्-सादयति । पश्चादक्ष७ँ सुराग्रहान् । पापवस्यसस्य विधृत्यै । एष वै यजमानः । यथ् सोमः । अन्न७ँ सुरा ।

सोमग्रहाꣳश्च सुराग्रहाꣳश्च व्यतिषजति । अन्नाद्येनैवैनं ँव्यतिषजति ।
**19 (10)**

**TB 1.3.3.6**

संपृचः स्थ सं मा भद्रेण पृङ्क्तेत्याह । अन्नं ँवै भद्रम् ।
अन्नाद्येनैवैनꣳ सꣳसृजति । अन्नस्य वा एतच्छमलम् । यथ् सुरा ।
पाप्मैव खलु वै शमलम् । पाप्मना वा एनमेतच्छमलेन व्यतिषजति ।
यथ् सोमग्रहाꣳश्च सुराग्रहाꣳश्च व्यतिषजति । विपृचः स्थ वि मा
पाप्मना पृङ्क्तेत्याह । पाप्मनैवैनꣳ शमलेन व्यावर्तयति । **20 (10)**

**TB 1.3.3.7**

तस्माद् वाजपेययाजी पूतो मेध्यो दक्षिण्यः । प्राङ्द्रवति सोमग्रहैः ।
अमुमेव तैर् लोक-मभिजयति । प्रत्यङ्ख्सुरा ग्रहैः ।
इममेव तैर् लोक-मभिजयति । प्रतिष्ठन्ति सोमग्रहैः ।
यावदेव सत्यम् । तेन सूयते । वाजसृद्भ्यः सुराग्रहान्. हरन्ति ।
अनृतेनैव विशꣳ सꣳसृजति ( ) । हिरण्यपात्रं मधोः पूर्णं ददाति ।
मधव्योऽसानीति । एकधा ब्रह्मण उप हरति । एकधैव यजमान आयु
स्तेजो दधाति । **21 (14)**

*(आप्त्वाऽवरुन्धे - सोमः - शमलं यथ् सुरा - ह्य-स्यैनं ँव्यतिषजति-व्यावर्तयति - सृजति चत्वारि च ) (A3)*

## 1.3.4 अनुवाकं 4 - पशवः सप्तदश

**TB 1.3.4.1**

ब्रह्मवादिनो वदन्ति । नाग्निष्टोमो नोक्थ्यः । न षोडशी नातिरात्रः । अथ कस्माद् वाजपेये सर्वे यज्ञक्रतवोऽवरुध्यन्त इति । पशुभिरिति ब्रूयात् । आग्नेयं पशुमालभते । अग्निष्टोममेव तेनावरुन्धे । ऐन्द्राग्नेनोक्थ्यम् । ऐन्द्रेण षोडशिनः स्तोत्रम् । सारस्वत्या-ऽतिरात्रम् । **22 (10)**

**TB 1.3.4.2**

मारुत्या बृहतः स्तोत्रम् । एतावन्तो वै यज्ञक्रतवः । तान् पशुभिरेवा-वरुन्धे । आत्मानमेव स्पृणो-त्यग्निष्टोमेन । प्राणापाना-वुक्थ्येन । वीर्यं॑ षोडशिनः स्तोत्रेण । वाच-मतिरात्रेण । प्रजां बृहतः स्तोत्रेण । इममेव लोकमभि जयत्यग्निष्टोमेन । अन्तरिक्ष-मुक्थ्येन । **23 (10)**

**TB 1.3.4.3**

सुवर्गं ँल्लोकꣳ षोडशिनः स्तोत्रेण । देवयानानेव पथ आरोह-

त्यतिरात्रेण । नाकꣳ रोहति बृहतः स्तोत्रेण । तेज एवात्मन् धत्त

आग्नेयेन पशुना । ओजो बलमैन्द्राग्नेन । इन्द्रिय-मैन्द्रेण ।

वाचꣳ सारस्वत्या । उभावेव देवलोकं च मनुष्यलोकं चाभिजयति

मारुत्या वशया । सप्तदश प्राजापत्यान् पशूनालभते ।

सप्तदशः प्रजापतिः । **24 (10)**

**TB 1.3.4.4**

प्रजापतेराप्त्यै । श्यामा एकरूपा भवन्ति । एवमिव हि प्रजापतिः

समृद्ध्यै । तान् पर्यग्निकृता-नुथ्सृजति ।

मरुतो यज्ञमजिघाꣳसन् प्रजापतेः । तेभ्य एतां मारुतीं ँवशामालभत

। तयैवैना-नशमयत् । मारुत्या प्रचर्य । एतान्थ् संज्ञपयेत् ।

मरुत एव शमयित्वा । **25 (10)**

**TB 1.3.4.5**

एतैः प्रचरति । यज्ञस्याघाताय । एकधा वपा जुहोति । एकदेवत्या

हि । एते । अथो एकधैव यजमाने वीर्यं दधाति ।

नैवारेण सप्तदशशरावे-णैतर्.हि प्रचरति । एतत् पुरोडाशा ह्येते ।
अथो पशूनामेव छिद्रमपिदधाति । सारस्वत्योत्तमया प्रचरति ( ) ।
वाग् वै सरस्वती । तस्मात् प्राणानां ँवागुत्तमा । अथो प्रजापतावेव
यज्ञं प्रतिष्ठापयति । प्रजापतिर्. हि वाक् । अपन्नदती भवति ।
तस्मान्-मनुष्याः सर्वां ँवाचं ँवदन्ति । **26 (16)**

*(अतिरात्र - मन्तरिक्षमुक्थ्येन - प्रजापतिः - शमयित्वोत् - तमया प्रचरति षट् च) (A4)*

## 1.3.5 अनुवाकं 5 - रथयाजनम्

**TB 1.3.5.1**

सावित्रं जुहोति कर्मणः कर्मणः पुरस्तात् । कस्तद्-वेदेत्याहुः ।
यद्-वाजपेयस्य पूर्वं ँयदपरमिति ।
सवितृप्रसूत एव यथापूर्वं कर्माणि करोति । सवने सवने जुहोति ।
आक्रमणमेव तथ् सेतुं ँयजमानः कुरुते ।
सुवर्गस्य लोकस्य समष्ट्यै । वाचस्पतिर्-वाचमद्य स्वदाति न
इत्याह । वाग्वै देवानां पुराऽन्नमासीत् ।

वाचमेवास्मा अन्न॒ꣳ स्वदयति । **27 (10)**

**TB 1.3.5.2**

इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति विजित्यै । वाजस्य
नु प्रसवे मातरं महीमित्याह । यच्चैवेयम् । यच्चास्यामधि ।
तदेवा–वरुन्धे । अथो तस्मिन्नेवोभयेऽभिषिच्यते । अफ्स्वन्तर–
मृतमफ्सु भेषजमित्यश्वान् पल्पूलयति । अफ्सु वा अश्वस्य तृतीयं
प्रविष्टम् । तदनुवेनन्ववप्लवते । यदफ्सु पल्पूलयति । **28 (10)**

**TB 1.3.5.3**

यदेवास्याफ्सु प्रविष्टम् । तदेवावरुन्धे । बहु वा अश्वो–ऽमेध्य–
मुपगच्छति । यदफ्सु पल्पूलयति । मेध्यानेवैनान् करोति । वायुर्वा
त्वा मनुर्वा त्वेत्याह । एता वा एतं देवता अग्रे अश्वमयुञ्जन्न् ।
ताभिरेवैनान्. युनक्ति । सवस्योज्जित्यै ।
यजुषा युनक्ति व्यावृत्त्यै । **29 (10)**

**TB 1.3.5.4**

अपां न पादाशुहेमन्निति संमार्ष्टि । मेध्यानेवैनान् करोति ।
अथो स्तौत्येवैनानाजिꣳ सरिष्यतः । विष्णु क्रमान् क्रमते ।

विष्णुरेव भूत्वेमान्-लोका-नभिजयति । वैश्वदेवो वै रथः ।
अङ्कौ न्यङ्कावभितो रथं ँयावित्याह । या एव देवता रथे प्रविष्टाः ।
ताभ्य एव नमस्करोति । आत्मनोऽनार्त्यै ( ) । अशमरथं भावुकोऽस्य
रथो भवति । य एवं ँवेद । **30 (12)** *(स्वदयति - पल्पूलयति - व्यावृत्त्या - अनार्त्यै द्वे च) (A5)*

## 1.3.6 अनुवाकं 6 - रथधावनम्

**TB 1.3.6.1**

देवस्याह७ं सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमित्याह ।
सवितृप्रसूत एव ब्रह्मणा वाजमुज्जयति ।
देवस्याह७ं सवितुः प्रसवे बृहस्पतिना वाजजिता वर्.षिष्ठं नाक७ं
रुहेयमित्याह । सवितृप्रसूत एव ब्रह्मणा वर्.षिष्ठं नाक७ं रोहति ।
चात्वाले रथचक्रं निमित७ं रोहति ।
अतो वा अङ्गिरस उत्तमाः सुवर्गं ँलोकमायन्न् ।
साक्षादेव यजमानः सुवर्गं ँलोकमेति । आवेष्टयति । वज्रो वै रथः ।
वज्रेणैव दिशोऽभिजयति । **31 (10)**

**TB 1.3.6.2**

वाजिना८ँ साम गायते । अन्नं ँवै वाजः । अन्नमे-वावरुन्धे ।
वाचो वर्ष्म देवेभ्योऽपाक्रामत् । तद्-वनस्पतीन् प्राविशत् ।
सैषा वाग्-वनस्पतिषु वदति । या दुन्दुभौ । तस्माद्-दुन्दुभिः
सर्वा वाचोति वदति । दुन्दुभीन्थ् समाघ्नन्ति ।
परमा वा एषा वाक् । **32 (10)**

**TB 1.3.6.3**

या दुन्दुभौ । परमयैव वाचाऽवरां ँवाचम-वरुन्धे ।
अथो वाच एव वर्ष्म यजमानो ऽवरुन्धे ।
इन्द्राय वाचं ँवदतेन्द्रं ँवाजं जापयतेन्द्रो वाजमजयि-दित्याह ।
एष वा एतर्.हीन्द्रः । यो यजते । यजमान एव वाजमुज्जयति ।
सप्तदश प्रव्याधानाजिं धावन्ति । सप्तदश७ँ स्तोत्रं भवति ।
सप्तदश सप्तदश दीयन्ते । **33 (10)**

**TB 1.3.6.4**

सप्तदशः प्रजापतिः । प्रजापते-राप्त्यै । अर्वाऽसि सप्तिरसि
वाज्यसीत्याह । अग्निर्वा अर्वा । वायुः सप्तिः । आदित्यो वाजी ।

एताभिरेवास्मै देवताभिर्-देवरथं ँयुनक्ति । प्रष्टिवाहिनं ँयुनक्ति ।
प्रष्टिवाही वै देवरथः । देवरथमेवास्मै युनक्ति । **34 (10)**

**TB 1.3.6.5**

वाजिनो वाजं धावत काष्ठां गच्छतेत्याह । सुवर्गो वै लोकः काष्ठा ।
सुवर्गमेव लोकं ँयन्ति । सुवर्गं ँवा एते लोकं ँयन्ति । य आजिं
धावन्ति । प्राञ्चो धावन्ति । प्राङिव हि सुवर्गो लोकः ।
चतसृभिरनु मन्त्रयते । चत्वारि छन्दाꣳसि । छन्दोभिरेवैनान्थ् सुवर्गं
ँलोकं गमयति । **35 (10)**

**TB 1.3.6.6**

प्र वा एतेऽस्माल्-लोकाच्च्यवन्ते । य आजिं धावन्ति । उदञ्च
आवर्तन्ते । अस्मादेव तेन लोकान्नयन्ति । रथविमोचनीयं
जुहोति प्रतिष्ठित्यै । आ मा वाजस्य प्रसवो जगम्यादित्याह ।
अन्नं ँवै वाजः । अन्नमेवावरुन्धे । यथालोकं ँवा एत उज्जयन्ति ।
य आजिं धावन्ति । **36 (10)**

**TB 1.3.6.7**

कृष्णलं कृष्णलँ वाजसृद्भ्यः प्रयच्छति । यमेव ते वाजँ

लोकमुज्जयन्ति । तं परिक्रीया-वरुन्धे । एकधा ब्रह्मण उपहरति ।

एकधैव यजमाने वीर्यं दधाति । देवा वा ओषधीष्वाजिमयुः ।

ता बृहस्पति-रुदजयत् । स नीवारान्निरवृणीत ।

तन्नीवाराणां नीवारत्वम् । नैवारश्चरुर्-भवति । **37 (10)**

**TB 1.3.6.8**

एतद्वै देवानां परममन्नम् । यन्नीवाराः । परमेणैवास्मा अन्नाद्ये-नावर-

मन्नाद्यमवरुन्धे । सप्तदशशरावो भवति । सप्तदशः प्रजापतिः ।

प्रजापते-राप्त्यै । क्षीरे भवति । रुचमेवास्मिन्-दधाति ।

सर्पिष्वान् भवति मेध्यत्वाय । बार्.हस्पत्यो वा एष देवतया ( ) ।

**38 (10)**

**TB 1.3.6.9**

यो वाजपेयेन यजते । बार्.हस्पत्य एष चरुः । अश्वान्थ्-सरिष्यतः

सस्रुषश्चाव-घ्रापयति । यमेव ते वाजँ लोकमुज्जयन्ति । तमेवावरुन्धे ।

अजीजिपत वनस्पतय इन्द्रं वाजँ विमुच्यध्वमिति दुन्दुभीन्.

विमुञ्चति । यमेव ते वाजँ लोकमिन्द्रियं दुन्दुभय उज्जयन्ति ।

तमेवा-वरुन्धे । **39 (8)**

*(अभिजयति - वा एषा वाग् - दीयन्ते - ऽस्मै युनक्ति - गमयति - य आजिं धावन्ति - भवति - देवतया - +ऽष्टौ च) (A6)*

## 1.3.7 अनुवाकं 7 - यूपारोहणम्

**TB 1.3.7.1**

ताप्यँ यजमानं परिधापयति । यज्ञो वै ताप्यम् । यज्ञेनैवैनꣳ समर्धयति । दर्भमयं परिधापयति । पवित्रं वै दर्भाः । पुनात्येवैनम् । वाजं वा एषोऽवरुरुत्सते । यो वाजपेयेन यजते । ओषधयः खलु वै वाजः । यद्-दर्भमयं परिधापयति । **40 (10)**

**TB 1.3.7.2**

वाजस्याव-रुद्ध्यै । जाय एहि सुवो रोहावेत्याह । पत्निया एवैष यज्ञस्यान्-वारम्भोऽनवच्छित्यै । सप्तदशा-रत्निर्यूपो भवति । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । तूपर-श्चतुरश्रिर्-भवति । गौधूमं चषालम् । न वा एते व्रीहयो न यवाः । यद्-गोधूमाः ।**41 (10)**

**TB 1.3.7.3**

एवमिव हि प्रजापतिः समृद्ध्यै । अथो अमुमेवास्मै लोकमन्नवन्तं

करोति । वासोभिर्-वेष्टयति । एष वै यजमानः । यद्यूपः । सर्वदेवत्यं

ँवासः । सर्वाभिरेवैनं देवताभिः समर्धयति । अथो आक्रमणमेव

तथ्सेतुं ँयजमानः कुरुते । सुवर्गस्य लोकस्य समष्ट्यै ।

द्वादश वाजप्रसवीयानि जुहोति । **42 (10)**

**TB 1.3.7.4**

द्वादश मासाः सँवथ्सरः । सँवथ्सरमेव प्रीणाति ।

अथो सँवथ्सरमेवास्मा उप दधाति । सुवर्गस्य लोकस्य समष्ट्यै ।

दशभिः कल्पै रोहति । नव वै पुरुषे प्राणाः । नाभिर्दशमी ।

प्राणानेव यथास्थानं कल्पयित्वा । सुवर्गं ँलोकमेति ।

एतावद्वै पुरुषस्य स्वम् । **43 (10)**

**TB 1.3.7.5**

यावत्-प्राणाः । यावदेवास्यास्ति । तेन सह सुवर्गं ँलोकमेति ।

सुवर्देवा॑ अगन्मेत्याह । सुवर्गमेव लोकमेति । अमृता अभूमेत्याह ।

अमृतमिव हि सुवर्गो लोकः । प्रजापतेः प्रजा अभूमेत्याह ।

प्राजापत्यो वा अयं ँलोकः । अस्मादेव तेन लोकान्नैति । **44 (10)**

**TB 1.3.7.6**

समहं प्रजया सं मया प्रजेत्याह । आशिषमेवैता-माशास्ते ।

आसपुटैर् घ्नन्ति । अन्नं ँवा इयम् । अन्नाद्येनैवैन॑ समर्धयन्ति ।

ऊषैर् घ्नन्ति । एते हि साक्षादन्नम् । यदूषाः ।

साक्षादेवैन-मन्नाद्येन समर्धयन्ति । पुरस्तात्-प्रत्यञ्चं घ्नन्ति । **45 (10)**

**TB 1.3.7.7**

पुरस्ताद्धि प्रतीचीन-मन्नमद्यते । शीर्.षतो घ्नन्ति । शीर्.षतो

ह्यन्नमद्यते । दिग्भ्यो घ्नन्ति । दिग्भ्य एवास्मा अन्नाद्य-मवरुन्धते ।

ईश्वरो वा एष पराङ्-प्रदघः । यो यूप॑ रोहति ।

हिरण्यमध्य-वरोहति । अमृतं ँवै हिरण्यम् ।

अमृत॑ सुवर्गो लोकः( ) । **46 (10)**

**TB 1.3.7.8**

अमृत एव सुवर्गे लोके प्रति तिष्ठति । शतमानं भवति । शतायुः

पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रति तिष्ठति । पुष्ट्यै वा एतद्-

रूपम् । यदजा । त्रिः सँवथ्सरस्यान्यान्-पशून् परि प्रजायते ।

बस्ताजिन-मध्यव रोहति । पुष्ट्यामेव प्रजनने प्रतितिष्ठति । **47 (9)**

*(परिधापयति - गोधूमा - जुहोति - स्वं - नैति -*
*प्रत्यञ्जं घ्नन्ति - लोको - +नव च (A7)*

## 1.3.8 अनुवाकं 8 – अन्नहोमाः, अभिषेकश्च

**TB 1.3.8.1**

सप्तान्न-होमाञ्जुहोति । सप्त वा अन्नानि । यावन्त्येवान्नानि ।
तान्येवावरुन्धे । सप्त ग्राम्या ओषधयः । सप्तारण्याः ।
उभयीषा-मवरुद्ध्यै । अन्नस्या-न्नस्य जुहोति । अन्नस्यान्नस्या-
वरुद्ध्यै । यद्-वाजपेययाज्य-नवरुद्धस्याऽश्नीयात् । **48 (10)**

**TB 1.3.8.2**

अवरुद्धेन व्यृध्येत । सर्वस्य समवदाय जुहोति । अनवरुद्ध-
स्यावरुद्ध्यै । औदुम्बरेण स्रुवेण जुहोति । ऊर्ग्वा अन्न-मुदुम्बरः ।
ऊर्ज एवान्नाद्यस्यावरुद्ध्यै । देवस्य त्वा सवितुः प्रसव इत्याह ।
सवितृ प्रसूत एवैनं ब्रह्मणा देवताभि-रभिषिञ्चति ।
अन्नस्यान्नस्याभिषिञ्चति । अन्नस्यान्नस्यावरुद्ध्यै । **49 (10)**

**TB 1.3.8.3**

पुरस्तात्-प्रत्यञ्च-मभिषिञ्चति । पुरस्ताद्धि-प्रतीचीन-मन्नमद्यते ।
शीर्.षतोऽभिषिञ्चति । शीर्.षतो ह्यन्नमद्यते । आमुखादन्वव
स्रावयति । मुखत एवास्मा अन्नाद्यं दधाति ।
अग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह । एष वा अग्नेः सवः ।
तेनैवैन-मभिषिञ्चति । इन्द्रस्य त्वा
साम्राज्येनाभिषिञ्चामीत्याह । **50 (10)**

**TB 1.3.8.4**

इन्द्रिय-मेवास्मि-न्नेतेन दधाति । बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चा
-मीत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैन-मभिषिञ्चति ।
सोमग्रहा॒श्चा-वदानीयानि चर्त्विग्भ्य उप हरन्ति ।
अमुमेव तैर् लोक-मन्नवन्तं करोति ।
सुराग्रहा॒श्चा-नवदानीयानि च वाजसृद्भ्यः ।
इममेव तैर् लोक-मन्नवन्तं करोति ।
अथो उभयीष्वेवाभिषिच्यते । विमाथं कुर्वते वाजसृतः । **51 (10)**

**TB 1.3.8.5**

इन्द्रियस्यावरुद्ध्यै । अनिरुक्ताभिः प्रातस्सवने स्तुवते । अनिरुक्तः प्रजापतिः । प्रजापतेराप्त्यै । वाजवतीभिर्-माध्यन्दिने । अन्नं वै वाजः । अन्नमेवा-वरुन्धे । शिपिविष्टवतीभि-स्तृतीयसवने । यज्ञो वै विष्णुः । पशवः शिपिः ( ) । यज्ञ एव पशुषु प्रति तिष्ठति । बृहदन्त्यं भवति । अन्तमेवैनꣳ श्रियै गमयति । **52 (13)**

*(अश्नीया – दन्नस्यान्नस्या वरुद्ध्या – इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चा मीत्याह–वाजसृतः – शिपि स्त्रीणि च) (A8)*

**1.3.9 अनुवाकं 9 – अतिग्राह्याः, पञ्चैन्द्राः**

**TB 1.3.9.1**

नृषदं त्वेत्याह । प्रजा वै नृन् । प्रजानामेवैतेन सूयते । द्रुषदमित्याह । वनसपतयो वै द्रु । वनस्पतीनामेवै तेन सूयते । भुवनसद-मित्याह । यदा वै वसीयान् भवति । भुवनमगन्निति वै तमाहुः । भुवनमेवैतेन गच्छति । **53 (10)**

**TB 1.3.9.2**

अफ्सुषदं त्वा घृतसद-मित्याह । अपामेवैतेन घृतस्य सूयते ।

व्योमसद-मित्याह । यदा वै वसीयान् भवति ।
व्योमागन्निति वै तमाहुः । व्योमैवैतेन गच्छति । पृथिविषदं
त्वाऽन्तरिक्षसद-मित्याह । एषामेवैतेन लोकाना॑ सूयते । तस्माद्
वाजपे-ययाजी न कं चन प्रत्यवरोहति ।
अपीव हि देवताना॑ सूयते ( ) । **54 (10)**

**TB 1.3.9.3**

नाकसद-मित्याह । यदावै वसीयान् भवति । नाकमगन्निति वै तमाहुः ।
नाकमेवैतेन गच्छति । ये ग्रहाः पञ्चजनीना इत्याह । पञ्चजनाना-
मेवैतेन सूयते । अपा॑ रसमुद्वयस-मित्याह । अपामेवैतेन रसस्य
सूयते । सूर्यरश्मि॑ समाभृत-मित्याह सशुक्रत्वाय । **55 (9)**

*(गच्छति - सूयते - +नव च) (A9)*

## 1.3.10 अनुवाकं 10 – पिण्डपितृयज्ञः दर्शपूर्णमासब्राह्मणशेषः

**TB 1.3.10.1**

इन्द्रो वृत्र॑ हत्वा । असुरान् पराभाव्य । सोऽमावास्यां प्रत्यागच्छत् ।
ते पितरः पूर्वेद्यु-रागच्छन्न् । पितॄन्. यज्ञोऽगच्छत् । तं देवाः

पुनरयाचन्त । तमेभ्यो न पुनरददुः । तेऽब्रुवन् वरं वृणामहै ।

अथ वः पुनर्दास्यामः । अस्मभ्यमेव पूर्वेद्युः क्रियाता इति । **56 (10)**

**TB 1.3.10.2**

तमेभ्यः पुनरददुः । तस्मात्–पितृभ्यः पूर्वेद्युः क्रियते । यत् पितृभ्यः

पूर्वेद्युः करोति । पितृभ्य एव तद्–यज्ञं निष्क्रीय यजमानः प्रतनुते ।

सोमाय पितृपीताय स्वधा नम इत्याह ।

पितुरेवाधि सोमपीथमव रुन्धे । न हि पिता प्रमीयमाण आहैष

सोमपीथ इति । इन्द्रियं वै सोमपीथः । इन्द्रियमेव सोमपीथमव–

रुन्धे । तेनेन्द्रियेण द्वितीयां जायामभ्यश्नुते । **57 (10)**

**TB 1.3.10.3**

एतद् वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन् । तस्मात् ते द्वेद्वे जाये

अभ्याक्षत । य एवं वेद । अभि द्वितीयां जायामश्नुते ।

अग्नये कव्यवाहनाय स्वधा नम इत्याह । य एव पितृणामग्निः ।

तं प्रीणाति । तिस्र आहुतीर् जुहोति । त्रिर्निदधाति ।

षट्थ् संपद्यन्ते । **58 (10)**

**TB 1.3.10.4**

षड्वा ऋतवः । ऋतूनेव प्रीणाति । तूष्णीं मेक्षण–मादधाति ।
अस्ति वा हि षष्ठ ऋतुर्न वा । देवान्. वै पितॄन् प्रीतान् ।
मनुष्याः पितरोऽनु प्रपिपते । तिस्र आहुतीर् जुहोति । त्रिर्निदधाति ।
षट्थ् संपद्यन्ते । षड्वा ऋतवः । **59 (10)**

**TB 1.3.10.5**

ऋतवः खलु वै देवाः पितरः । ऋतूनेव देवान् पितॄन् प्रीणाति ।
तान्प्रीतान् । मनुष्याः पितरोऽनु प्रपिपते ।
सकृदाच्छिन्नं बर्.हिर् भवति । सकृदिव हि पितरः । त्रिर्निदधाति ।
तृतीये वा इतो लोके पितरः । तानेव प्रीणाति ।
पराङावर्तते । **60 (10)**

**TB 1.3.10.6**

ह्लीका हि पितरः । औष्मणो व्यावृत उपास्ते । ऊष्मभागा हि पितरः ।
ब्रह्मवादिनो वदन्ति । प्राश्यां(3)न प्राश्या(3)मिति । यत् प्राश्नीयात् ।
जन्यमन्नमद्यात् । प्रमायुकः स्यात् । यन्न प्राश्नीयात् ।
अहविः स्यात् । **61 (10)**

**TB 1.3.10.7**

पितृभ्य आवृश्च्येत । अवघ्रेयमेव । तन्नेव प्राशितं नेवाप्राशितम् ।
वीरं ँवा वै पितरः प्रयन्तो हरन्ति । वीरं ँवा ददति । दशां छिनत्ति ।
हरणभागा हि पितरः । पितॄनेव निरवदयते । उत्तर आयुषि लोम
छिन्दीत । पितृणाऽ ह्येतर्.हि नेदीयः । **62 (10)**

**TB 1.3.10.8**

नमस्करोति । नमस्कारो हि पितृणाम् । नमो वः पितरो रसाय ।
नमो वः पितरः शुष्माय । नमो वः पितरो जीवाय ।
नमो वः पितरः स्वधायै । नमो वः पितरो मन्यवे ।
नमो वः पितरो घोराय । पितरो नमो वः ।
य एतस्मिन् ँलोके स्थ । **63 (10)**

**TB 1.3.10.9**

युष्माऽस्तेऽनु । येऽस्मिन् ँलोके । मां ते नु । य एतस्मिन् ँलोके स्थ ।
यूयं तेषां ँवसिष्ठा भूयास्त । येऽस्मिन् ँलोके । अहं तेषां ँवसिष्ठो
भूयासमित्याह । वसिष्ठः समानानां भवति । य एवं ँविद्वान्-पितृभ्यः
करोति । एष वै मनुष्याणां ँयज्ञः । **64 (10)**

**TB 1.3.10.10**

देवानां ँवा इतरे यज्ञाः । तेन वा एतत् पितृलोके चरति । यत्
पितृभ्यः करोति । स ईश्वरः प्रमेतोः । प्राजापत्ययर्चा पुनरैति ।
यज्ञो वै प्रजापतिः । यज्ञेनैव सह पुनरैति । न प्रमायुको भवति ।
पितृलोके वा एतद्-यजमानश्चरति । यत् पितृभ्यः करोति ( ) ।
स ईश्वर आर्तिमार्तोः । प्रजापति-स्त्वावैनं तत उन्नेतुमर्.हतीत्याहुः ।
यत् प्राजापत्ययर्चा पुनरैति । प्रजापतिरेवैनं तत उन्नयति ।
नार्तिमार्च्छति यजमानः । **65 (15)**

*(इत्य - श्नुते - पद्यन्ते - पद्यन्ते षड्वा ऋतवो - वर्तते़ऽ - हविः स्यान् - नेदीयः - स्थ - यज्ञो - यजमानश्चरति यत् पितृभ्यः करोति पञ्च च) (A10)*

**Prapaataka Korvai with starting Padams of 1 to 10 Anuvaakams :-**

(देवासुरा अग्नीषोमयोर् - देवा वै यथा दर्.शं - देवा वै यदन्यैर् ग्रहैर् - ब्रह्मवादिनो नाग्निष्टोमो न - सावित्रं - देवस्याहं - तार्प्यं॒ - सप्तान्नहोमान् - नृषदं - त्वेन्द्रो वृत्रं॒ हत्वा दश)

**Korvai with starting Padams of 1, 11, 21 Series of dasanees :-**

देवासुरा – वाज्येवैनं – तस्माद् वाजपेययाजी – देवस्याहं – वाजस्यावरुद्ध्या– इन्द्रियमेवास्मिन्. – ह्लीका हि पितरः पञ्चषष्टिः

**First and Last Padam of 3rd Prapaatakam :-**

( देवासुरा – यजमानः)

हरिः ओं

कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके

तृतीयः प्रपाठकः समाप्तः

## Details of Dasani & Vaakyams for Ashtakam 1 – Prapaatakam 3 – TB 1.3

| | Dasani | Vaakyams |
|---|---|---|
| Anuvakam 1 | 7 | 69 |
| Anuvakam 2 | 7 | 71 |
| Anuvakam 3 | 7 | 74 |
| Anuvakam 4 | 5 | 56 |
| Anuvakam 5 | 4 | 42 |
| Anuvakam 6 | 9 | 88 |
| Anuvakam 7 | 8 | 79 |
| Anuvakam 8 | 5 | 53 |
| Anuvakam 9 | 3 | 29 |
| Anuvakam 10 | 10 | 105 |
| Total → | 65 | 666 |

## 1.4 प्रथमाष्टके चतुर्थः प्रपाठकः – सोमादिब्राह्मणं

### 1.4.1 अनुवाकं 1 – ग्रहणा ग्रहणम्

**T.B. 1.4.1.1**

उभये वा एते प्रजापतेरध्य–सृज्यन्त । देवाश्चासुराश्च ।
तान्न व्यजानात् । इमेऽन्य इमेऽन्य इति । स देवान॑ शूनकरोत् ।
तानभ्यषुणोत् । तान् पवित्रेणा–पुनात् । तान्–परस्तात्–पवित्रस्य–
व्यगृह्णात् । ते ग्रहा अभवन्न् । तद्ग्रहाणां ग्रहत्वम् । **1 (10)**

**T.B. 1.4.1.2**

देवता वा एता यजमानस्य गृहे गृह्यन्ते । यद् ग्रहाः । विदुरेनं देवाः ।
यस्यैवं ँविदुष एते ग्रहा गृह्यन्ते । एषा वै सोमस्याहुतिः ।
यदुपा॑शुः । सोमेन देवा॑ स्तर्पयाणीति खलु वै सोमेन यजते ।
यदुपा॑शुं जुहोति । सोमेनैव तद्–देवा॑ स्तर्पयति ।
यद्ग्रहाञ्जुहोति । **2 (10)**

**T.B. 1.4.1.3**

देवा एव तद्–देवान्–गच्छन्ति । यच्चमसाञ्जुहोति । तेनैवानुरूपेण
यजमानः सुवर्गं ँलोकमेति । किं न्वेतदग्र आसीदित्याहुः ।

यत् पात्राणीति । इयं ँवा एतदग्र आसीत् । मृन्मयानि वा एतान्यासन्न् ।
तैर्देवा न व्यावृत–मगच्छन्न् । त एतानि दारुमयाणि पात्राण्य–पश्यन्न् ।
तान्यकुर्वत । **3 (10)**

**T.B. 1.4.1.4**

तैर्वै ते व्यावृत–मगच्छन्न् । यद्–दारुमयाणि पात्राणि भवन्ति ।
व्यावृतमेव तैर् यजमानो गच्छति । यानि दारुमयाणि पात्राणि
भवन्ति । अमुमेव तैर्–लोक–मभिजयति । यानि मृन्मयानि । इममेव
तैर्–लोक–मभिजयति । ब्रह्मवादिनो वदन्ति । काश्चतस्रः
स्थालीर्वायव्याः सोमग्रहणीरिति । देवा वै पृश्निमदुह्रन्न् । **4 (10)**

**T.B. 1.4.1.5**

तस्या एते स्तना आसन्न् । इयं ँवै पृश्निः । तामादित्या
आदित्यस्थाल्या चतुष्पदः पशूनदुह्रन्न् । यदादित्यस्थाली भवति ।
चतुष्पद एव तया पशून्. यजमान इमां दुहे ।
तामिन्द्र उक्थ्यस्थाल्येन्द्रिय–मदुहत् । यदुक्थ्यस्थाली भवति ।
इन्द्रियमेव तया यजमान इमां दुहे ।

ताँ विश्वे देवा आग्रयणस्थाल्योर्ज-मदुहन्न् ।

यदाग्रयणस्थाली भवति ( ) । **5 (10)**

**T.B. 1.4.1.6**

ऊर्जमेव तया यजमान इमां दुहे । तां मनुष्याद् ध्रुवस्थाल्या

ऽऽयुरदुहन्न् । यद्ध्रुवस्थाली भवति । आयुरेव तया यजमान इमां

दुहे । स्थाल्या गृह्णाति । वायव्येन जुहोति । तस्मादन्येन पात्रेण

पशून् दुहन्ति । अन्येन प्रतिगृह्णन्ति । अथो व्यावृतमेव तद्-यजमानो

गच्छति । **6 (9)** *(ग्रहत्वं - ग्रहान् जुहोत्य - कुर्व - तादुह्नन् - नाग्रयणस्थाली भवति - +नव च) (A1)*

## 1.4.2 अनुवाकं 2 – सोत्रामणीशेषा मन्त्राः

**T.B. 1.4.2.1**

युवꣳ सुराममश्विना । नमुचावाऽसुरे सचा । विपिपाना शुभस्पती ।

इन्द्रं कर्मस्वावतम् । पुत्रमिव पितरावश्विनोभा ।

इन्द्रावतं कर्मणा दꣳसनाभिः । यथ् सुरामँ व्यपिबः शचीभिः ।

सरस्वती त्वा मघवन्नभीष्णात् । अहाव्यग्ने हविरास्ये ते ।

स्रुचीव घृतं चमू इव सोमः । 7 (10)

**T.B. 1.4.2.2**

वाजसनिꣳ रयिमस्मे सुवीरम् । प्रशस्तं धेहि यशसं बृहन्तम् ।

यस्मिन्नश्वास ऋषभास उक्षणः । वशा मेषा अवसृष्टास आहुताः ।

कीलालपे सोमपृष्ठाय वेधसे । हृदामतिं जनय चारुमग्नये ।

नाना हि वां देवहितꣳ सदो मितम् । मा सꣳसृक्षाथां परमे व्योमन्न् ।

सुरा त्वमसि शुष्मिणी सोम एषः ।

मा मा हिꣳसीः स्वां ँयोनिमाविशन्न् । 8 (10)

**T.B. 1.4.2.3**

यदत्र शिष्टꣳ रसिनः सुतस्य । यदिन्द्रो अपिबच्छचीभिः ।

अहं तदस्य मनसा शिवेन । सोमꣳ राजानमिह भक्षयामि ।

द्वे स्रुती अशृणवं पितॄणाम् । अहं देवानामुत मर्त्यानाम् । ताभ्यामिदं

ँविश्वं भुवनꣳ समेति । अन्तरा पूर्वमपरं च केतुम् ।

यस्ते देव वरुण गायत्रछन्दाः पाशः । तं त एतेनावयजे । 9 (10)

**T.B. 1.4.2.4**

यस्ते देव वरुण त्रिष्टुप्छन्दाः पाशः । तं त एतेनावयजे ।

यस्ते देव वरुण जगतीछन्दाः पाशः । तं त एतेनावयजे ।

सोमो वा एतस्य राज्यमादत्ते । यो राजा सन् राज्यो वा सोमेन

यजते । देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳ

सवाः । त एवास्मै सवान् प्रयच्छन्ति । त एनं पुनः सुवन्ते

राज्याय ( ) । देवसू राजा भवति । **10 (11)**

*(सोम – आविशन्. – यजे – राज्यायैकं च) (A2)*

**1.4.3 अनुवाकं 3 – दोहप्रायश्चित्तम्, अग्निहोत्रे**

**T.B. 1.4.3.1**

उदस्थाद्–देव्यदितिर्–विश्वरूपी । आयुर्यज्ञपतावधात् । इन्द्राय

कृण्वती भागम् । मित्राय वरुणाय च । इयं ँवा अग्निहोत्री ।

इयं ँवा एतस्य निषीदति । यस्याग्निहोत्री निषीदति । तामुत्थापयेत् ।

उदस्थाद्–देव्यदितिरिति । इयं ँवै देव्यदितिः । **11 (10)**

**T.B. 1.4.3.2**

इमामेवास्मा उत्थापयति । आयुर्यज्ञपतावधादित्याह । आयुरेवास्मिन्
दधाति । इन्द्राय कृण्वती भागं मित्राय वरुणाय चेत्याह ।
यथा यजुरेवैतत् । अवर्तिँ वा एषैतस्य पाप्मानं प्रतिख्याय निषीदति ।
यस्या-ग्निहोत्र्युपसृष्टा निषीदति । तां दुग्ध्वा ब्राह्मणाय दद्यात् ।
यस्यान्नं नाद्यात् । अवर्तिमेवास्मिन् पाप्मानं प्रतिमुञ्चति । **12 (10)**

**T.B. 1.4.3.3**

दुग्ध्वा ददाति । न ह्यदृष्टा दक्षिणा दीयते । पृथिवीँ वा एतस्य पयः
प्रविशति । यस्याग्निहोत्रं दुह्यमान॑ स्कन्दति । यदद्य दुग्धं
पृथिवीमसक्त । यदोषधी-रप्यसरद्-यदापः । पयो गृहेषु पयो
अघ्नियासु । पयो वथ्सेषु पयो अस्तु तन्मयीत्याह । पय एवात्मन्
गृहेषु पशुषु धत्ते । अप उपसृजति । **13 (10)**

**T.B. 1.4.3.4**

अद्भिरेवैनदाप्नोति । यो वै यज्ञस्यार्तेनानार्त॑ स॑ सृजति ।
उभे वै ते तर्ह्यार्च्छतः । आर्च्छति खलु वा एतदग्निहोत्रम् ।
यद्-दुह्यमान॑ स्कन्दति । यदभिदुह्यात् ।

आर्तेनानार्तं यज्ञस्य सꣳसृजेत् । तदेव यादृक्कीदृक्च होतव्यम् ।

अथान्यां दुग्ध्वा पुनर्.-होतव्यम् । अनार्तेनैवार्तं यज्ञस्य निष्करोति ।

**14 (10)**

**T.B. 1.4.3.5**

यद्-युद्दुतस्य स्कन्देत् । यत् ततोऽहुत्वा पुनरेयात् ।

यज्ञं विच्छिन्द्यात् । यत्र स्कन्देत् । तन्निषद्य पुनर्गृह्णीयात् ।

यत्रैव स्कन्दति । तत एवैनत्-पुनर्गृह्णाति ।

तदेव यादृक्-कीदृक्च होतव्यम् । अथान्यां दुग्ध्वा पुनर्.-होतव्यम् ।

अनार्तेनैवार्तं यज्ञस्य निष्करोति । **15 (10)**

**T.B. 1.4.3.6**

वि वा एतस्य यज्ञश्छिद्यते । यस्याग्निहोत्रेऽधिश्रिते श्वाऽन्तरा धावति ।

रुद्रः खलु वा एषः । यदग्निः । यद्-गामन्वत्यावर्तयेत् ।

रुद्राय पशू-नपिदध्यात् । अपशुर्-यजमानः स्यात् । यदपो

ऽन्वतिषिञ्चेत् । अनाद्य-मग्नेरापः । अनाद्यमाभ्या-मपिदध्यात् ( ) ।

गार्.हपत्याद्-भस्मादाय । इदं विष्णुर्-विचक्रम इति वैष्णव्यार्चा

ऽऽहवनीयादध्वꣳ सयन्नुद्रवेत् । यज्ञो वै विष्णुः ।

यज्ञेनैव यज्ञ९ँ सन्तनोति । भस्मना पदमपिवपति शान्त्यै । **16 (15)**

*(वै देव्यदितिर् – मुञ्चति – सृजति – करोति – करोत्या – भ्यामपिदध्यात् पञ्च च) (A3)*

**1.4.4** <u>अनुवाकं **4** – अग्निप्रायश्चित्तम् अग्निहोत्रे</u>

**<u>T.B. 1.4.4.1</u>**

नि वा एतस्याहवनीयो गार्.हपत्यं कामयते । नि गार्.हपत्य आहवनीयम् । यस्याग्निमनुद्धृत९ँ सूर्योऽभिनिम्रोचति । दर्भेण हिरण्यं प्रबध्य पुरस्ताद्धरेत् । अथाग्निम् । अथाग्निहोत्रम् । यद्धिरण्यं पुरस्ताद्धरति । ज्योतिर्वै हिरण्यम् । ज्योतिरेवैनं पश्यन्–नुद्धरति । यदग्निं पूर्व९ँ हरत्यथा–ग्निहोत्रम् । **17 (10)**

**<u>T.B. 1.4.4.2</u>**

भागधेयेनैवैनं प्रणयति । ब्राह्मण आर्.षेय उद्धरेत् । ब्राह्मणो वै सर्वा देवताः । सर्वाभिरेवैनं देवताभिरुद्धरति । अग्निहोत्र–मुपसा–द्यातमितो–रासीत । व्रतमेव हतमनु म्रियते । अन्तं ँवा एष आत्मनो गच्छति । यस्ताम्यति । अन्तमेष यज्ञस्य गच्छति ।

यस्याग्निमनुद्धृत॒ सूर्योऽभिनिम्रोचति । **18 (10)**

**T.B. 1.4.4.3**

पुनः समन्य जुहोति । अन्तेनैवान्तं यज्ञस्य निष्करोति । वरुणो वा एतस्य यज्ञं गृह्णाति । यस्याग्नि–मनुद्धृत॒ सूर्योऽभिनिम्रोचति । वारुणं चरुं निर्वपेत् । तेनैव यज्ञं निष्क्रीणीते । नि वा एतस्याहवनीयो गार्.हपत्यं कामयते । नि गार्.हपत्य आहवनीयम् । यस्याग्नि–मनुद्धृत॒ सूर्योऽभ्युदेति । चतुर्गृहीत–माज्यं पुरस्ताद्धरेत् । **19 (10)**

**T.B. 1.4.4.4**

अथाग्निम् । अथाग्निहोत्रम् । यदाज्यं पुरस्ताद्धरति । एतद्वा अग्नेः प्रियं धाम । यदाज्यम् । प्रियेणैवैनं धाम्ना समर्धयति । यदग्निं पूर्व॒ हरत्यथा–ग्निहोत्रम् । भागधेयेनैवैनं प्रणयति । ब्राह्मण आर्.षेय उद्धरेत् । ब्राह्मणो वै सर्वा देवताः । **20 (10)**

**T.B. 1.4.4.5**

सर्वाभिरेवैनं देवताभिरुद्धरति । पराची वा एतस्मै व्युच्छन्ती व्युच्छति । यस्याग्नि–मनुद्धृत॒ सूर्योऽभ्युदेति ।

उषाः केतुना जुषताम् । यज्ञं देवेभिरिन्वितम् । देवेभ्यो मधुमत्तम७
स्वाहेति प्रत्यङ्-निषद्याज्येन जुहुयात् । प्रतीचीमेवास्मै विवासयति ।
अग्निहोत्र-मुपसाद्यातमितो-रासीत । व्रतमेव हतमनु म्रियते ।
अन्तं ँवा एष आत्मनो गच्छति । **21 (10)**

**T.B. 1.4.4.6**

यस्ताम्यति । अन्तमेष यज्ञस्य गच्छति । यस्याग्नि-मनुद्धृत८्
सूर्योऽभ्युदेति । पुनः समन्य जुहोति । अन्तेनैवान्तं ँयज्ञस्य
निष्करोति । मित्रो वा एतस्य यज्ञं गृह्णाति । यस्याग्नि-मनुद्धृत८्
सूर्योऽभ्युदेति । मैत्रं चरुं निर्वपेत् । तेनैव यज्ञं निष्क्रीणीते ।
यस्या-हवनीयेऽनुद्वाते गार्.हपत्य उद्वायेत् । **22 (10)**

**T.B. 1.4.4.7**

यदाहवनीय-मनुद्वाप्य गार्.हपत्यं मन्थेत् । विच्छिन्द्यात् ।
भ्रातृव्यमस्मै जनयेत् । यद्वै यज्ञस्य वास्तव्यं क्रियते ।
तदनु रुद्रोऽवचरति । यत् पूर्व-मन्ववस्येत् ।
वास्तव्य-मग्निमुपासीत । रुद्रोऽस्य पशून् घातुकः स्यात् ।

आहवनीय–मुद्वाप्य । गार्.हपत्यं मन्थेत् । 23 (10)

**T.B. 1.4.4.8**

इतः प्रथमं जज्ञे अग्निः । स्वाद्योनेरधि जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या । देवेभ्यो हव्यं ँवहतु प्रजानन्निति । छन्दोभिरेवैन॑ स्वाद्योनेः प्रजनयति । गार्.हपत्यं मन्थति । गार्.हपत्यं ँवा अन्वाहिताग्नेः पशव उप तिष्ठन्ते । स यदुद्वायति । तदनु पशवोऽपक्रामन्ति । इषे रय्यै रमस्व । 24 (10)

**T.B. 1.4.4.9**

सहसे द्युम्नाय । ऊर्जे पत्यायेत्याह । पशवो वै रयिः । पशूनेवास्मै रमयति । सारस्वतौ त्वोथ्सौ समिन्धातामित्याह । ऋख् सामे वै सारस्वतावुथ्सौ । ऋख्–सामाभ्यामेवैन॑ समिन्धे । सम्राडसि विराडसीत्याह । रथन्तरं ँवै सम्राट् । बृहद्–विराट् । 25 (10)

**T.B. 1.4.4.10**

ताभ्यामेवैन॑ समिन्धे । वज्रो वै चक्रम् । वज्रो वा एतस्य यज्ञं ँविच्छिनत्ति । यस्यानो वा रथो वाऽन्तराऽग्नी याति । आहवनीय–मुद्वाप्य । गार्.हपत्या–दुद्धरेत् । यदग्ने पूर्वं प्रभृतं

पद॑ हि ते । सूर्यस्य रश्मीन–न्वाततान । तत्र रयिष्ठामनु संभरैतम् ।
सं नः सृज सुमत्या वाजवत्येति ( ) । **26 (10)**

**T.B. 1.4.4.11**

पूर्वेणैवास्य यज्ञेन यज्ञमनु सं तनोति । त्वमग्ने सप्रथा असीत्याह ।
अग्निः सर्वा देवताः । देवताभिरेव यज्ञ॑ सं तनोति । अग्नये
पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् । अग्निमेव पथिकृत॑ स्वेन
भागधेयेनोप धावति । स एवैनं यँज्ञियं पन्थामपि–नयति ।
अनड्वान्–दक्षिणा । वही ह्येष समृद्ध्यै । **27 (9)**

*(हरत्यथाग्निहोत्रं – निम्रोचति – हरेद् – देवता – गच्छ –*
*त्युद्वायेन्–मन्थेद्–रमस्व–बृहद् विराड्–इति–नव च) (A4)*

**Special Korvai**

(नि वै पूर्वं त्रीणि निम्रोचति दर्भेण यद्धिरण्यमग्निहोत्रं पुनर्वरुणो
वारुणं नि वा एतस्याभ्युदेति चतुर्गृहीतमाज्यं यदाज्यं पराच्युषाः
पुनर्मित्रो मैत्रं यस्याहवनीयेऽनुद्वाते गार्.हपत्यो यद्वै मन्थेदुद्धरेत्)

## 1.4.5 अनुवाकं 5 – सोमातिरेकप्रायश्चित्तम्

**T.B. 1.4.5.1**

यस्य प्रातस्सवने सोमोऽतिरिच्यते । माध्यन्दिन॒ सवनं

कामयमानो–ऽभ्यतिरिच्यते । गौर्धयति मरुतामिति धयद्वतीषु कुर्वन्ति ।

हिनस्ति वै सन्ध्यधीतम् । सन्धीव खलु वा एतत् । यथ् सवन

स्यातिरिच्यते । यद्धयद्वतीषु कुर्वन्ति । सन्धेः शान्त्यै । गायत्र॒ साम

भवति पञ्चदशः स्तोमः । तेनैव प्रातस्सवनान्नयन्ति । **28 (10)**

**T.B. 1.4.5.2**

मरुत्वतीषु कुर्वन्ति । तेनैव माध्यन्दिनाथ्–सवनान्नयन्ति । होतुश्च

मसमनून्नयन्ते । होताऽनुश॒सति । मध्यत एव यज्ञ॒ समादधाति ।

यस्य माध्यन्दिने सवने सोमोऽतिरिच्यते । आदित्यं तृतीयसवनं

कामयमानो–ऽभ्यतिरिच्यते । गौरिवीत॒ साम भवति । अतिरिक्तं

ँवै गौरिवीतम् । अतिरिक्तं ँयथ् सवनस्या–तिरिच्यते । **29 (10)**

**T.B. 1.4.5.3**

अतिरिक्तस्य शान्त्यै । बण्महा॒ असि सूर्येति कुर्वन्ति ।

यस्यैवादित्यस्य सवनस्य कामेनातिरिच्यते ।

तेनैवैनं कामेन समर्धयन्ति । गौरिवीत७ँ साम भवति ।

तेनैव माध्यन्दिनाथ्–सवनान्नयन्ति । सप्तदशः स्तोमः ।

तेनैव तृतीयसवनान्नयन्ति । होतुश्चमसमनून्नयन्ते ।

होताऽनुश७ँ सति । **30 (10)**

**T.B. 1.4.5.4**

मध्यत एव यज्ञ७ँ समादधाति । यस्य तृतीयसवने सोमोऽतिरिच्येत ।

उक्थ्यं कुर्वीत । यस्योक्थ्येऽतिरिच्येत । अतिरात्रं कुर्वीत ।

यस्या–तिरात्रेऽतिरिच्यते। तत्त्वै दुष्प्रज्ञानम् । यजमानं ँवा एतत् पशव

आसाद्य यन्ति । बृहथ् साम भवति । बृहद्वा इमां ँल्लोकान्

दाधार ( ) । बार्.हताः पशवः । बृहतैवास्मै पशून् दाधार ।

शिपिविष्टवतीषु कुर्वन्ति । शिपिविष्टो वै देवानां पुष्टम् । पुष्ट्यैवैन७ँ

समर्धयन्ति । होतुश्चमसमनून्नयन्ते । होताऽनुश७ँसति ।

मध्यत एव यज्ञ७ँ समादधाति । **31 (18)**

*(यन्ति – सवनस्यातिरिच्यते – श७ँसति – दाधाराष्टौ च) (A5)*

## 1.4.6 अनुवाकं 6 – सवननिमित्तं प्रायश्चित्तम्

**T.B. 1.4.6.1**

एकैको वै जनताया-मिन्द्रः । एकं ँवा एताविन्द्रमभि स॒ꣳसुनुतः ।
यौ द्वौ स॒ꣳसुनुतः । प्रजापतिर्वा एष वितायते । यद्-यज्ञः ।
तस्य ग्रावाणो दन्ताः । अन्यतरं ँवा एते स॒ꣳसुन्वतोर्-निर्बप्सति ।
पूर्वेणोपसृत्या देवता इत्याहुः । पूर्वोपसृतस्य वै श्रेयान् भवति ।
एतिवन्त्याज्यानि भवन्त्य-भिजित्यै । **32 (10)**

**T.B. 1.4.6.2**

मरुत्वतीः प्रतिपदः । मरुतो वै देवाना-मपराजित-मायतनम् ।
देवाना-मेवापराजित आयतने यतते । उभे बृहद्रथन्तरे भवतः ।
इयं ँवाव रथन्तरम् । असौ बृहत् । आभ्यामेवैन-मन्तरेति ।
वाचश्च मनसश्च । प्राणाच्चा-पानाच्च । दिवश्च पृथिव्याश्च । **33 (10)**

**T.B. 1.4.6.3**

सर्वस्माद्-वित्ताद्-वेद्यात् । अभिवर्तो ब्रह्मसामं भवति । सुवर्गस्य
लोकस्या-भिवृत्त्यै । अभिजिद्-भवति । सुवर्गस्य लोकस्या-
भिजित्यै । विश्वजिद्-भवति । विश्वस्य जित्यै ।

यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः ।

स देवता वृङ्क्त इति । यद्यग्निष्टोमः सोमः परस्ताथ्–स्यात् । **34 (10)**

**T.B. 1.4.6.4**

उक्थ्यं कुर्वीत । यद्युक्थ्यः स्यात् । अतिरात्रं कुर्वीत । यज्ञक्रतुभि–

रेवास्य देवता वृङ्क्ते । यो वै छन्दोभि–रभिभवति । स सꣳ सुन्वतो–

रभिभवति । सम्ँवेशाय त्वोपवेशाय–त्वेत्याह । छन्दाꣳसि वै

सम्ँवेश उपवेशः । छन्दोभिरेवास्य छन्दाꣳस्य–भिभवति ।

इष्टर्गो वा ऋत्विजा–मध्वर्युः । **35 (10)**

**T.B. 1.4.6.5**

इष्टर्गः खलु वै पूर्वोऽर्ष्टुः क्षीयते । प्राणापानौ मृत्योर्मा पातमित्याह ।

प्राणापानयोरेव श्रयते । प्राणापानौ मा मा हासिष्टमित्याह ।

नैनं पुराऽऽयुषः प्राणापानौ जहितः । आर्तिँ वा एते नियन्ति ।

येषां दीक्षितानां प्रमीयते । तँ यदववर्जेयुः । क्रूरकृतामिवैषाँ लोकः

स्यात् । आहर दहेति ब्रूयात् । **36 (10)**

**T.B. 1.4.6.6**

तं दक्षिणतो वेद्यै निधाय । सर्पराज्ञिया ऋग्भिः स्तुयुः । इयं ँवै सर्पतो राज्ञी । अस्या एवैनं परिददति । व्यृद्धं तदित्याहुः । यथ् स्तुत–मननुशस्त–मिति । होता प्रथमः प्रचीनावीती मार्जालीयं परीयात् । यामीरनु–ब्रुवन्न् । सर्पराज्ञीनां कीर्तयेत् । उभयोरेवैनं ँलोकयोः परिददति । **37 (10)**

**T.B. 1.4.6.7**

अथो धुवन्त्येवैनम् । अथो न्येवास्मै ह्नुवते । त्रिः परियन्ति । त्रय इमे लोकाः । एभ्य एवैनं ँलोकेभ्यो धुवते । त्रिः पुनः परियन्ति । षट्थ् संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवैनं धुवते । अग्न आयूꣳषि पवस इति प्रतिपदं कुर्वीरन्न् ( ) । रथन्तरसामैषाꣳ सोमः स्यात् । आयुरेवात्मन्–दधते । अथो पाप्मानमेव विजहतो यन्ति । **38 (13)** *(अभिजित्यै – पृथिव्याश्च – स्या – दध्वर्युर् – ब्रुयाल् – लोकयोः परिददति – कुर्वरꣳ स्त्रीणि च) (A6)*

## 1.4.7 अनुवाकं 7 – यूपविरोहणादिप्रायश्चित्तम्

**T.B. 1.4.7.1**

असुर्यं ँवा एतस्माद्-वर्णं कृत्वा । पशवो वीर्य-मपक्रामन्ति ।
यस्य यूपो विरोहति । त्वाष्ट्रं बहुरूप-मालभेत । त्वष्टा वै
रूपाणामीशे । य एव रूपाणामीशे । सोऽस्मिन् पशून्. वीर्यं
ँयच्छति । नास्मात्-पशवो वीर्य-मपक्रामन्ति । आर्तिं ँवा एते
नियन्ति । एषां दीक्षिताना-मग्नि-रुद्वायति । **39 (10)**

**T.B. 1.4.7.2**

यदाहवनीय उद्वायेत् । यत्तं मन्थेत् । विच्छिन्द्यात् । भ्रातृव्यमस्मै
जनयेत् । यदाहवनीय उद्वायेत् । आग्नीद्ध्रा-दुद्धरेत् । यदाग्नीद्ध्र
उद्वायेत् । गार्.हपत्या-दुद्धरेत् । यद् गार्.हपत्य उद्वायेत् ।
अत एव पुनर् मन्थेत् । **40 (10)**

**T.B. 1.4.7.3**

अत्र वाव स निलयते । यत्र खलु वै निलीन-मुत्तमं पश्यन्ति ।
तदेन-मिच्छन्ति । यस्माद्-दारोरुद्वायेत् । तस्यारणी कुर्यात् ।
क्रुमुकमपि कुर्यात् । एषा वा अग्नेः प्रिया तनूः । यत्-क्रुमुकः ।

प्रियय़ैवैनं तनुवा समर्धयति । गार्.हपत्यं मन्थति । **41 (10)**

**T.B. 1.4.7.4**

गार्.हपत्यो वा अग्नेर्योनिः । स्वादेवैनं ँयोनेर्-जनयति । नास्मै भ्रातृव्यं जनयति । यस्य सोम उपदस्येत् । सुवर्ण॒ं हिरण्यं द्वेधा विच्छिद्य । ऋजीषेऽन्यदाधूनुयात् । जुहुयादन्यत् । सोममेवा-भिषुणोति । सोमं जुहोति । सोमस्य वा अभिषूयमाणस्य प्रिया तनू-रुदक्रामत् । **42 (10)**

**T.B. 1.4.7.5**

तथ् सुवर्ण॒ं हिरण्य-मभवत् । यथ् सुवर्ण॒ं हिरण्यं कुर्वन्ति । प्रियय़ैवैनं तनुवा समर्धयन्ति । यस्याक्रीत॒ं सोम-मपहरेयुः । क्रीणीयादेव । सैव ततः प्रायश्चित्तिः । यस्य क्रीतमपहरेयुः । आदारा॒श्च फाल्गुनानि चाभिषुणुयात् । गायत्री य॒ं सोममाहरत् । तस्य यो॒ऽ॒ंशुः पराऽपतत् । **43 (10)**

**T.B. 1.4.7.6**

त आदारा अभवन्न् । इन्द्रो वृत्रमहन्न् । तस्य वल्कः पराऽपतत् । तानि फाल्गुनान्यभवन्न् । पशवो वै फाल्गुनानि ।

पशवः सोमो राजा । यदादारा७श्च फाल्गुनानि चाभिषुणोति ।
सोममेव राजानमभिषुणोति । शृतेन प्रातस्सवने श्रीणीयात् ।
दध्ना मध्यन्दिने । **44 (10)**

**T.B. 1.4.7.7**

नीतमिश्रेण तृतीयसवने । अग्निष्टोमः सोमः स्याद् रथन्तरसामा ।
य एवर्त्विजो वृताः स्युः । त एनं ँयाजयेयुः । एकां गां दक्षिणां
दद्यात्तेभ्य एव । पुनः सोमं क्रीणीयात् । यज्ञेनैव तद्–यज्ञ–मिच्छति ।
सैव ततः प्रायश्चित्तिः । सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य
आत्मान–मागुरते । यः सत्रायागुरते ( ) । एतावान्–खलु वै पुरुषः ।
यावदस्य वित्तम् । सर्ववेदसेन यजेत । सर्वपृष्ठोऽस्य सोमः स्यात् ।
सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं
निष्क्रीणीते । **45 (15)**

*(उद्वायति – मन्थेन् – मन्थ – त्यक्रामत् – पराऽपतन् – मध्यन्दिन – आगुरते पञ्च च) (A7)*

## 1.4.8 अनुवाकं 8 – पावमानीमन्त्राः (स्मार्ते स्नानादौ मार्जनार्थाश्च)

**T.B. 1.4.8.1**

पवमानः सुवर्जनः । पवित्रेण विचर्.षणिः । यः पोता स पुनातु मा ।
पुनन्तु मा देवजनाः । पुनन्तु मन वो धिया । पुनन्तु विश्व आयवः ।
जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतू॒ँ रनु । **46 (10)**

**T.B. 1.4.8.2**

यत्ते पवित्र–मर्चिषि । अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे ।
उभाभ्यां देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वी–स्तनुवो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु । वय॑ँ स्याम पतयो रयीणाम् । **47 (10)**

**T.B. 1.4.8.3**

वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयोभूः । द्यावापृथिवी
पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् । बृहद्भिः सवित
स्तृभिः । वर्.षिष्ठैर् देव मन्मभिः । अग्ने दक्षैः पुनाहि मा । येन देवा
अपुनत । येनापो दिव्यं कशः । तेन दिव्येन ब्रह्मणा । **48 (10)**

**T.B. 1.4.8.4**

इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभिः संभृत७ँ रसम् ।
सर्व७ँ स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति ।
ऋषिभिः संभृत७ँ रसम् । तस्मै सरस्वती दुहे ।
क्षीर७ँ सर्पिर्–मधूदकम् । पावमानीः स्वस्त्ययनीः । **49 (10)**

**T.B. 1.4.8.5**

सुदुघा हि पयस्वतीः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृत७ँ
हितम् । पावमानीर् दिशन्तु नः । इमं ँल्लोकमथो अमुम् । कामान्थ्
समर्धयन्तु नः । देवीर् देवैः समाभृताः । पावमानीः स्वस्त्ययनीः ।
सुदुघाहि घृतश्चुतः । ऋषिभिः सम्भृतो रसः । **50 (10)**

**T.B. 1.4.8.6**

ब्राह्मणेष्वमृत७ँ हितम् । येन देवाः पवित्रेण । आत्मानं पुनते सदा ।
तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् ।
शतोद्याम७ँ हिरण्मयम् । तेन ब्रह्म विदो वयम् । पूतं ब्रह्म पुनीमहे ।
इन्द्रः सुनीती सह मा पुनातु ( ) । सोमः स्वस्त्या वरुणः
समीच्या । यमो राजा प्रमृणाभिः पुनातु मा ।

जातवेदा मोर्जयन्त्या पुनातु । **51 (13)**

*(अनु – रयीणां – ब्रह्मणा – स्वस्त्ययनीः – सुदुघा हि घृतश्चुत ऋषिभिः सम्भृतो रसः – पुनातु त्रीणि च ) (A8)*

**1.4.9** अनुवाकं **9** – राजसूयगतचातुर्मास्यशेषः

**T.B. 1.4.9.1**

प्रजा वै सत्रमासत तपस्तप्यमाना अजुह्वतीः । देवा अपश्यं चमसं घृतस्य पूर्णꣳ स्वधाम् । तमुपोदतिष्ठन्त–मजुहवुः । तेनार्धमास ऊर्जमवारुन्धत । तस्मादर्धमासे देवा इज्यन्ते । पितरोऽपश्यं चमसं घृतस्य पूर्णꣳ स्वधाम् । तमुपोदतिष्ठन्त– मजुहवुः । तेन मास्यूर्जमवारुन्धत । तस्मान् मासि पितृभ्यः क्रियते । मनुष्या अपश्यं चमसं घृतस्य पूर्णꣳ स्वधाम् । **52 (10)**

**T.B. 1.4.9.2**

तमुपोदतिष्ठन्त–मजुहवुः । तेन–द्वयीमूर्जमवारुन्धत । तस्माद्–द्विरह्नो–मनुष्येभ्य उपह्रियते । प्रातश्च सायं च । पशवोऽपश्यं चमसं घृतस्य पूर्णꣳ स्वधाम् ।

तमुपोदतिष्ठन्त–मजुहवुः । तेन–त्रयीमूर्जमवा–रुन्धत ।

तस्मात् त्रिरह्नः पशवः प्रेरते । प्रातस्संगवे सायम् ।

असुरा अपश्यं चमसं घृतस्य पूर्णꣳ स्वधाम् । **53 (10)**

**<u>T.B. 1.4.9.3</u>**

तमुपोदतिष्ठन्त–मजुहवुः । तेन सँवथ्सर ऊर्जमवा–रुन्धत ।

ते देवा अमन्यन्त । अमी वा इदमभूवन्न् । यद्वयꣳस्म इति ।

त एतानि चातुर्मास्यान्यपश्यन्न् । तानि निरवपन्न् । तैरेवैषां

तामूर्जमवृञ्जत । ततो देवा अभवन्न् । पराऽसुराः । **54 (10)**

**<u>T.B. 1.4.9.4</u>**

यद्–यजते । यामेव देवा ऊर्जमवारुन्धत । तां तेना–वरुन्धे ।

यत् पितृभ्यः करोति । यामेव पितर ऊर्जमवा–रुन्धत ।

तां तेना–वरुन्धे । यदावसथेऽन्नꣳ हरन्ति । यामेव मनुष्या ऊर्जमवा–

रुन्धत । तां तेना–वरुन्धे । यद् दक्षिणां ददाति । **55 (10)**

**<u>T.B. 1.4.9.5</u>**

यामेव पशव ऊर्जमवा–रुन्धत । तां तेना–वरुन्धे । यच्चातुर्–

मास्यैर्–यजते । यामेवासुरा ऊर्जम–वारुन्धत । तां तेना–वरुन्धे ।

भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति । विराजो वा एषा विक्रान्तिः ।
यच्चातुर्-मास्यानि । वैश्वदेवेनास्मिन् ँल्लोके प्रत्यतिष्ठत् ( ) । वरुण
प्रघासै-रन्तरिक्षे । साकमेधै-रमुष्मिन् ँल्लोके । एष ह त्वावैतथ्
सर्वं भवति । य एवं ँविद्वा॑श्चातुर्मास्यैर् यजते । **56 (14)**

*(मनुष्या अपश्यञ्चमसं घृतस्य पूर्ण॑ स्वधा-मसुरा अपश्यञ्चमसं
घृतस्य पूर्ण॑ स्वधा-मसुरा-ददा-त्यतिष्ठ च्चत्वारि च) (A9)*

## 1.4.10 अनुवाकं 10 – चातुर्मास्यप्रशंसनम्

**T.B. 1.4.10.1**

अग्निर्वाव सँवथ्सरः । आदित्यः परिवथ्सरः । चन्द्रमा इदावथ्सरः ।
वायु-रनुवथ्सरः । यद्-वैश्वदेवेन यजते । अग्निमेव तथ् सँवथ्सर-
माप्नोति । तस्माद्-वैश्वदेवेन यजमानः । सँवथ्सरीणा॑ स्वस्ति-
माशास्त इत्याशासीत । यद्-वरुण प्रघासैर्-यजते ।
आदित्यमेव तत् परिवथ्सर-माप्नोति । **57 (10)**

**T.B. 1.4.10.2**

तस्माद्-वरुण-प्रघासैर् यजमानः । परिवथ्सरीणा॑ स्वस्ति-
माशास्त इत्याशासीत । यथ् साकमेधैर्-यजते । चन्द्रमसमेव
तदिदावथ्सर-माप्नोति । तस्माथ् साकमेधैर्-यजमानः ।
इदावथ्सरीणा॑ स्वस्ति-माशास्त इत्याशासीत । यत् पितृ यज्ञेन
यजते । देवानेव तदन्ववस्यति । अथ वा अस्य वायुश्चा-नुवथ्सरश्चा
प्रीतावुच्छिष्येते । यच्छुनासीरीयेण यजते । **58 (10)**

**T.B. 1.4.10.3**

वायुमेव तदनुवथ्सर-माप्नोति । तस्मा-च्छुनासीरीयेण यजमानः ।
अनुवथ्सरीणा॑ स्वस्ति-माशास्त इत्याशासीत । सँवथ्सरं ँवा एष
ईफ्सतीत्याहुः । यश्चातुर्-मास्यैर् यजत इति । एष ह त्वै संवथ्सर-
माप्नोति । य एवं ँविद्वा॑ श्चातुर्मास्यैर्-यजते । विश्वे देवाः
समयजन्त । तेऽग्निमेवायजन्त । त एतं ँलोकमजयन्न् । **59 (10)**

**T.B. 1.4.10.4**

यस्मिन्नग्निः । यद्-वैश्वदेवेन यजते । एतमेव लोकं जयति ।
यस्मिन्नग्निः । अग्नेरेव सायुज्यमुपैति । यदा वैश्वदेवेन यजते ।
अथ सँवथ्सरस्य गृहपति-माप्नोति । यदा सँवथ्सरस्य गृहपति-
माप्नोति । अथ सहस्रयाजिन-माप्नोति । यदा सहस्रयाजिन-
माप्नोति । **60 (10)**

**T.B. 1.4.10.5**

अथ गृहमेधिन-माप्नोति । यदा गृहमेधिन-माप्नोति ।
अथाग्निर् भवति । यदाऽग्निर् भवति । अथ गौर्भवति । एषा वै
वैश्वदेवस्य मात्रा । एतद्-वा एतेषामवमम् । अतोऽतो वा उत्तराणि
श्रेयाꣳसि भवन्ति । यद्-विश्वे देवाः समयजन्त ।
तद्-वैश्वदेवस्य वैश्वदेवत्वम् । **61 (10)**

**T.B. 1.4.10.6**

अथादित्यो वरुणꣳ राजानं वरुण प्रघासैरयजत । स एतं
ँलोकमजयत् । यस्मिन्नादित्यः । यद्-वरुण-प्रघासैर्-यजते ।
एतमेव लोकं जयति । यस्मिन्नादित्यः ।

आदित्यस्यैव-सायुज्य-मुपैति । यदादित्यो वरुण॑ राजानं ँवरुण प्रघासैरयजत । तद्-वरुण प्रघासानां ँवरुण प्रघासत्वम् । अथ सोमो राजा छन्दा॑सि साकमेधैरयजत । **62 (10)**

**T.B. 1.4.10.7**

स एतं ँलोकमजयत् । यस्मि॑ श्चन्द्रमा विभाति । यथ् साकमेधैर्-यजते । एतमेव लोकं जयति । यस्मि॑ श्चन्द्रमा विभाति । चन्द्रमस एव सायुज्य-मुपैति । सोमो वै चन्द्रमाः । एष ह त्वै साक्षाथ् सोमं भक्षयति । य एवं ँविद्वान्थ् साकमेधैर्-यजते । यथ् सोमश्च राजा छन्दा॑सि च समैधन्त । **63 (10)**

**T.B. 1.4.10.8**

तथ् साकमेधाना॑ साकमेधत्वम् । अथर्तवः पितरः प्रजापतिं पितरं पितृयज्ञे-नायजन्त । त एतं ँलोकमजयन्न् । यस्मिन्नृतवः । यत् पितृयज्ञेन यजते । एतमेव लोकं जयति । यस्मिन्नृतवः । ऋतूनामेव सायुज्य-मुपैति । यद्-ऋतवः पितरः प्रजापतिं पितरं पितृयज्ञेनायजन्त । तत् पितृयज्ञस्य पितृयज्ञत्वम् । **64 (10)**

**T.B. 1.4.10.9**

अथौषधय इमं देवं त्र्यम्बकै-रयजन्त प्रथेमहीति ।
ततो वै ता अप्रथन्त । य एवं ँविद्वा७ स्त्र्यम्बकैर्-यजते ।
प्रथते प्रजया पशुभिः । अथ वायुः परमेष्ठिन७् शुनासीरीयेणायजत ।
स एतं ँलोकमजयत् । यस्मिन्-वायुः । यच्छुनासीरीयेण यजते ।
एतमेव लोकं जयति । यस्मिन्-वायुः । **65 (10)**

**T.B. 1.4.10.10**

वायोरेव सायुज्य-मुपैति । ब्रह्मवादिनो वदन्ति । प्र चातुर्मास्ययाजी-
मीयता(3) न प्रमीयता(३) इति । जीवन्वा एष ऋतूनप्येति ।
यदि वसन्ता प्रमीयते । वसन्तो भवति । यदि ग्रीष्मे ग्रीष्मः ।
यदि वर्.षासु वर्.षाः । यदि शरदि शरत् । यदि हेमन्. हेमन्तः ( ) ।
ऋतुर्भूत्वा सँवथ्सरमप्येति । सँवथ्सरः प्रजापतिः ।
प्रजापतिर्वा वैषः । **66 (13)**

*(परिवथ्सरमाप्नोति – शुनासीरीयेण यजते – ऽजयन्थ् – सहस्रयाजिनमाप्नोति – वैश्वदेवत्वꣳ – साकमेधैरयजत – समैधन्त – पितृयज्ञत्वं – जयति यस्मिन् वायुर्. – हेमन्त स्त्रीणी च) (A10)*

| **Prapaataka Korvai with starting Padams of 1 to 10 Anuvaakams :-** |
|---|
| (उभये – युवꣳ सुराम – मुदस्थान् – नि वै – यस्य प्रातस्सवन – एकैको – ऽसुर्यम् – पवमानः – प्रजा वै सत्रमास – ताग्निर्वाव सँवथ्सरो दश ) |

| **Korvai with starting Padams of 1, 11, 21 Series of dasanees :-** |
|---|
| (उभये वा – उदस्थाथ् – सर्वाभिर् – मध्यतो – ऽत्र वाव – ब्राह्मणेष्व – थ गृहमेधिनꣳ षट्थ् षष्टिः) |

| **First and Last Padam of 4th Prapaatakam :-** |
|---|
| उभये – वावैषः |

हरिः ओं

कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके चतुर्थः प्रपाठकः

समाप्तः

==================

**Details of Dasani & Vaakyams for Ashtakam 1 – Prapaatakam 4**

| | Dasani | Vaakyams |
|---|---|---|
| Anuvakam 1 | 6 | 59 |
| Anuvakam 2 | 4 | 41 |
| Anuvakam 3 | 6 | 65 |
| Anuvakam 4 | 11 | 109 |
| Anuvakam 5 | 4 | 48 |
| Anuvakam 6 | 7 | 73 |
| Anuvakam 7 | 7 | 75 |
| Anuvakam 8 | 6 | 63 |
| Anuvakam 9 | 5 | 54 |
| Anuvakam 10 | 10 | 103 |
| Total → | 66 | 690 |